CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

S.V. Vedic University Series No : 12
Research & Publication (Special Drive)

CSS

शिवज्ञानबोधः

सदाशिवशिवाचार्यविरचितया
सिद्धान्तसूत्रवृत्त्या समन्वितः

प्रधानसम्पादकः
वेदाचार्यः श्री सन्निधानं सुदर्शन शर्मा
कुलपतिः

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपति
२००९

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

S.V. Vedic University Series No : 12
Research & Publication (Special Drive)

शिवज्ञानबोधः

सदाशिवशिवाचार्यविरचितया

सिद्धान्तसूत्रवृत्त्या समन्वितः

प्रधानसम्पादकः

वेदाचार्यः श्री सन्निधानं सुदर्शन शर्मा

कुलपतिः

सम्पादकः

डा. मुल्लपूडि सीताराम शास्त्री

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः

तिरुपति

२००९

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

ISBN: 978-93-81887-43-1

Śivajñānabōdhaḥ

Sadāśivaśivācāryaviracitayā Siddhāntasūtravṛttyā Samanvitaḥ

First impression : **2009**

Copies : **1000**

Price : ₹50=00

© **Sri Venkateswara Vedic University, Tirupati, A.P.**

Cheif Editor : **Prof. S. Sudarsana Sarma**
VICE-CHANCELLOR

Editor : **Dr. M Sitarama Sastry**

DTP & Published by
Sri Venkateswara Vedic University
Research & Publication (Special Drive)
Tirupati.

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

वेदाचार्यः सन्निधानं सुदर्शन शर्मा
कुलपतिः

पुरोवाक्

जङ्घन्येते चरणौ प्रक्रान्तायां पाठ्यग्रन्थप्रकाशनपद्धायाम् - इति महत् परितोषस्थानम्। श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः वेदविज्ञानाध्ययनाध्यापने - धार्मिकोद्बोधने-शिष्टाचरणे-सन्मार्गप्रचारणे च विद्यानां चतुर्दशत्वं कल्पयितुं कृतदीक्ष इति विदितचरमेव। ततश्च वयमेतेष्वारम्भवत्सरेषु निजाशयफलसिद्धिसौख्यमनुभवामः। प्रभवामश्च पुरोगामिकार्यविजयसाधने।

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयेन 'परिशोधन-प्रकाशनविभाग'(Research and Publication Wing) द्वारा पाठ्यपुस्तकप्रकाशनं क्रियते। तत्र परीक्षोपयोगिपुस्तकानि प्रकटय्य विद्यार्थिभ्यः प्रदातव्यानीति चास्मदाशयः। तदाशयसाधने कृतकृत्यतामातन्वानाः काव्यविभागेन साकम् आगम-वौदिक-सूत्रग्रन्थपरम्पराश्च प्राकाश्यमानयन्तः सानन्दा बोभवीमः।

छात्रोपयोगिनः शैवागमग्रन्थाः विरलगणेया एव गैर्वाण्यां प्रकाश्यन्ते। देवनागर्यां यद्येते समुन्मिषन्ति, तदा सङ्ख्यावद्गणः तत्तदागमपाठप्रचारादिकार्यक्रमे सौलभ्यं सारल्यं प्राप्नुयुः। तदनया धिया, शिवज्ञानबोध-कारणागमादि शैवागमग्रन्थजातं क्रमेण आलोकनसालोक्यमर्पयामः। तस्मिंश्च क्रमे प्रथमोऽयं क्रमः शिवज्ञानबोधः यो ह्यद्य स्पन्दते।

शैवागमेष्वन्यतमे रौरवागमे श्लोकरूपेण स्थितानां द्वादशसूत्राणां विपुलव्याख्यारूपोऽयं ग्रन्थः निदिध्यासितशिवहृदयानामाकलयतु हृदयप्रमोदनमोदनम्।

एतादृशग्रन्थपठन-पर्यालोचनादिना स्निह्यतु चेतः, देदीप्यतां च ज्ञानज्योतिः इत्याशास्महे।

तिरुपति
१५-०५-०९

सन्निधानं सुदर्शन शर्मा
कुलपतिः

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

प्रस्तावना

श्रीवेङ्कटाद्रिनिलयं वेदविज्ञानभासुरम्।
सर्वसङ्कल्पसम्पत्तिसाधकं नौमि स्वस्तरुम्।।

अपरोऽयं प्रमोदव्यतिकरः यः किल श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः महर्षिशेमुषीसमुन्मिषितं महाकविमधुरवचनामृतसंसर्गं च ग्रन्थजातं छात्र-पाठकोपयोगाय प्राकाश्यमानयन्, तुर्यस्तबकत्वेन शैवागममणिं शिवज्ञानबोधं मुद्रापयितुमुद्युङ्क्ते। चञ्चूर्यते कार्यसाफल्यमुद्दिश्य, स्याद्वा शनैर्गमनम्। किन्तु, पुरोगमनं चेत् प्रशंसार्हमेव किल।

विस्तृते शैवागमकोशजाले अन्यतमः प्रसिद्धः रौरवागमः। तत्र पाशविमोचनपटले स्थितानां द्वादशसूत्राणां विवरणप्रायोऽयं ग्रन्थः। श्लोकरूपतया निबद्धेष्वेतेषु सूत्रेषु श्री सदाशिवशिवाचार्यविरचिता "सिद्धान्तसूत्रवृत्तिः", गाढार्थविश्लथनद्वारा सुखप्रवेशयोग्यतामाकल्पयति। अत एवेदानीं तया वृत्त्या ग्रन्थोऽयं प्रकाश्यते, वेदविश्वविद्यालयेन।

"यस्य च ज्ञानेन सर्वं ज्ञातं भवति..." इति पूर्वान्तर्वाणिवचनानुसारम् अजित-कामिक-कारण-अचिन्त्य-वातुल-पौष्कर-प्रभृति शैवागमवचनानि बहून्यत्र ग्रन्थे प्रमाणतया समुट्टङ्कितान्यासन्।

"पुनरपि जननं पुनरपि मरणं...." इति जननमरणचक्रबद्धः पुरुषो जीवः पशुः। पतिस्तु भगवान् शङ्करः। एवं च पति-पशु-पाशविवेकोऽत्र ग्रन्थे प्रधानविषयः। पाशविमुक्तिद्वारा अद्वयां शिवसायुज्यरूपां मुक्तिं प्रतिपादयन्त्येतानि द्वादशसूत्राणि। एतदेव ग्रन्थप्रयोजनम्। शक्तिपातवन्तः अधिकारिणः। शिवानन्यानुभवः सम्बन्धः - इत्येवं साधनचतुष्टयादिकं **"स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात्। अस्ति कर्ता, सहृत्वैतत् सृजत्यस्मात् प्रभुर्हरः।।** इत्याद्यश्लोकविवरणारम्भे श्री सदाशिवशिवाचार्याः विशदं निरूपयामासुः।

एवं जीवन्मुक्तः पुरुषः पुनः कर्मबन्धं प्रविशति वा न वा इति द्वापरस्य विच्छेदकः दशमश्लोकः औपनिषदिकार्थपरामर्शने विशदमुकुरायते। "शिवेनैक्यं

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

गतस्सिद्धः, तदधीनस्ववृत्तिकः। मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान्।।" इत्येतद् ग्रन्थगतं सूत्रं, "यथा पुष्करपलाशे अपः न श्लिष्यन्ते ..... एवंविदि..... इति छान्दोग्यश्रुतिमनुसरति। अपि च, द्वादशार्कप्रभापटलसदृक्षानामेषां श्लोकानां श्रीसदाशिवशिवाचार्यविरचिता वृत्तिरपि विषयगम्भीर्ययुतात्र विराजते।

वेदविश्वविद्यालयेऽत्र "परिशोधन-प्रकाशनविभागः" वर्तते। प्रथमे वयसि तत्कृतः पदन्यासोऽयम्। एतस्य सारस्वतक्रतुकार्यस्य ग्रन्थप्रकाशनरूपस्य प्रोत्साहकेभ्यः वेदविश्वविद्यालयप्रारम्भकुलपतिभ्यः वेदाचार्येभ्यः श्री सन्निधानं सुदर्शन शर्म महोदयेभ्यः विनयकुसुमाञ्जलिं समर्पयामि। "स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः"।

सप्रयासेऽस्मिन् व्यापारे "परिशोधन-प्रकाशनविभाग"(Research and Publication Wing) वर्तिनां सहचराणां साहाय्यं कार्तज्ञ्यप्रकटने मां मुखरयति। तेषां पुरोऽभिवृद्धिमाकल्पतादाश्रितकल्पतरुः भगवान् श्रीनिवासः इति प्रार्थये। एतद् ग्रन्थप्रकाशनविषये अविस्मरणीयं करावलम्बनं प्रयच्छतोः पूज्यशिवाचार्ययोः श्री टि.वि.गणेश गुरुकुल- श्री सि.कार्तिकेयन् महाभागयोः सर्वधा कृतज्ञोऽस्मि। अपि च विज्ञानां सहृदयानामस्मत्पुरोविकासमाकाङ्क्षमाणानां च मित्राणां हितसूचनानि सादरमभिलषामि।

तिरुपति
विरोधिवर्ष, हनुमज्जयन्ती।

इत्थं विज्ञापयति सुधीविधेयः
मुल्लपूडि सीताराम शास्त्री
'जयः'

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

शिवज्ञानबोधः

श्लो - शिवं परात्परं नित्यं चिद्घनानन्दमद्वयम् ।
पशूनां पाशहर्तारं पञ्चकृत्याधिकारिणम् ।।
श्लो - विघ्नेशं स्कन्दमम्बाञ्च विश्वेशं च गिरां गुरुम् ।
नत्वा सिद्धान्तसूत्राणां वृत्तिं वक्ष्ये शिवाज्ञया ।।

श्रीमन्मेरौ कैलासनामकशिखरे विराजमानं श्रीदक्षिणामूर्तिं भगवन्तं श्री नन्दिकेश्वरो नमस्कृत्य, 'स्वामिन् ! पुरा चर्या क्रियायोगपादास्त्वनुगृहीताः । पक्वात्मनां सुमोक्षाय ज्ञानपादमनुगृहाणेति' पप्रच्छ सोऽपि तेन प्रश्नेनानुमोदितस्तथैवेति प्रतिज्ञाय यथाश्रुतमुपादिशत् । तद्यथा अर्थसृष्टेः पूर्वं निष्कळपरशिवात् नादादिवदनत्वेनोद्गीर्णं संज्ञारूपात्मकं ज्ञानमन्त्रविग्रहवत्तया सकलाऽकलात्मकसदाशिवदेवो बुध्वा, पशूनां चतुर्विधपुरुषार्थसिध्यर्थं त्रिपदार्थं चतुष्पादप्रतिपादकं कामिकाद्यष्टाविंशत्यागमजालं पञ्चवक्त्रैः निर्माय, प्रणवादिभ्यो दशभ्यश्च ते(?) वेभ्यः अनारीन् रुद्राद्यष्टादशेभ्यो रुद्रेभ्यश्चोपदिष्टवान् । सतेषामुपदेशकाले उपश्रोत्रा रुरुसंज्ञकेन सङ्गहरूपेण ज्ञानमार्गमुपदिशेति पृष्टस्सन् तथैवेत्यनुगृह्य, सकलागमेषु सारं समुद्धृत्य शिवज्ञानबोधाख्यम् अनुष्टुप्च्छन्दोरूपं द्वादशसूत्रात्मकं शास्त्रं प्रणीय, तस्मै समुपादिशत् । तत्सहितं सर्वागमजालमहौघप्रकारेण अनन्तेश्वरायोपदिष्टवान् सोऽपि यथाश्रुतं मह्यमुपादिशत् । अहमपि तद्रौरवागमान्तस्थ पाशविमोचनपटलपठितानि शिवज्ञानबोधसिध्दान्तसूत्राणि तदर्थांश्च, तुभ्यमुपदिशामि । त्वमपि पक्वात्मनस्तस्यार्थानुपदिशेत्युपदिष्टवान् ।

अथेदानीं निगमागमपारावारपारीणः वैदिक-शैव-सिद्धान्तस्थापनाचार्यः वामदेवऋषिसम्प्रदायप्रवर्तकः मणिकर्णिकामठनिवासः, प्रसिद्धनैष्ठिकवर्यः, विश्वेश्वरशिवाचार्य प्रधानशिष्यः, शैवसन्यासनिष्ठानिष्णातः सदाशिवः शिवाचार्योपगतानि सिद्धान्तसूत्राणि व्याकरोति ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

अस्मिन् शिवज्ञानबोधशास्त्रे, प्रथमद्वितीयसूत्राभ्यां, कर्तुः प्रमाणलक्षणे, संहारोत्पत्तिक्रमो मायाकर्मणोः प्रमाणलक्षणे च; तृतीयचतुर्थसूत्राभ्यां, पशुपशुत्वयोः प्रमाणलक्षणं, ईश्वरतिरोधानकृत्यञ्च, पञ्चमसूत्रेण, पशोरन्तर्यामित्वेन पशुपतेः पालकत्वविधानञ्च, षष्ठसप्तमसूत्राभ्यां, सदसन्निरूपणञ्च, अष्टमनवमसूत्राभ्यां, शिवानुग्रहपूर्वं श्रवणमननिधिध्यासनसाक्षात्कारफलितमोक्षक्रमश्च, दशम सूत्रेण, प्रपत्या पाशवासनाक्षयश्च, आगामिककर्मानवाप्तिश्च, एकादशद्वादशसूत्राभ्यां, अन्तरङ्गबाह्यभक्तिप्रतिपादकयोगक्रिया चर्याक्रमश्च, समाहृत्य-त्रिपदार्थाश्चतुष्पादाः प्रतिपादिताः।

अस्य शास्त्रस्य पति-पशु-पाशविवेको विषयः, पाशपरित्यागेन अखण्डाकारसच्चिदानन्दाद्वयपरिपूर्णशिवसायुज्यरूपमुक्तिः प्रयोजनं, शक्तिपातवन्तोऽधिकारिणः, आत्मनां शिवज्ञानेन शिवानन्यानुभवबोधस्सम्बन्धः।

शिवाभ्यां नमः

श्रीमद्रौरवागमे त्रिसप्ततितमे पाशविमोचनपटले शिवज्ञानबोधीयद्वादशमूलसूत्राणि

सू - स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता स हृत्वैतत्सृजत्यस्मात्प्रभुर्हरः ॥ ॥ १ ॥

सू - अन्यस्सन् व्याप्तितोऽनन्यः कर्ता कर्मानुसारतः ।
करोति संसृतिं पुंसामाज्ञया समवेतया ॥ ॥ २ ॥

सू - नेतितो ममतोद्रेकादक्षोपरतिबोधितः ।
स्वापे निर्भोगतो बोधे बोद्धृत्वादस्त्यणुस्तनौ ॥ ॥ ३ ॥

सू - आत्मान्तः करणादन्योऽप्यन्वितो मन्त्रिभूपवत् ।
अवस्थापञ्चकस्थोतो मलरुद्धस्सदृक्क्रियः ॥ ॥ ४ ॥

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सू - विदन्त्यक्षाणि पुंसार्थान्नस्स्वयं सोऽपि शम्भुना ।
तद्विकारी शिवश्चेन्न कान्तो यो वत्स तन्नयेत् ।। ।। ५ ।।

सू - अदृश्यञ्चेदसद्भावो दृश्यम्चेज्जडिमा भवेत् ।
शम्भोस्तद्व्यतिरेकेण ज्ञेयं रूपं विदुर्बुधाः ।। ।। ६ ।।

सू - नाचित् चित्सन्निधौ किन्तु न वित्तस्ते उभे मिधः ।
प्रपश्यशिवयोर्वेत्ता यस्स आत्मा तयोःपृथक् ।। ।। ७ ।।

सू - स्थित्वा सहेन्द्रियव्याधैः स्वं वेत्सीति बोधितः ।
मुक्त्वैतान् गुरुणाऽनन्यो धन्यः प्राप्नोति तत्पदम् ।। ।। ८ ।।

सू - चिद्दृशाऽऽत्मनि दृष्ट्वेशं त्यक्त्वा वृत्तिमरीचिकाम् ।
लब्ध्वा शिवपदच्छायां ध्यायेत्पञ्चाक्षरीं सुधीः ।। ९ ।।

सू - शिवेनैक्यङ्गतस्सिद्धस्तदधीनस्स्ववृत्तिकः ।
मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान् ।। ।। १० ।।

सू - दृशो दर्शयिता चात्मा तस्य दर्शयिता शिवः ।
तस्मात्तस्मिन् परां भक्तिं कुर्यादात्मोपकारके ।। ।। ११ ।।

सू - मुक्त्यै प्राप्य सदस्तेषां भजेद्वेषं शिवालयम् ।
एवं विद्यात् शिवज्ञानबोधे शैवार्थ निर्णयः ।। ।। १२ ।।

इति श्रीमद्रौरवागमे त्रिसप्ततितमे पाशविमोचनपटले
द्वादशाध्याये
शिवज्ञानबोधीय द्वादशसूत्राणि

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

।। श्री महागणाधिपतये नमः ।।

सव्याख्यानशिवज्ञानबोधशास्त्रे
प्रथमद्वितीयसूत्रे आरभ्येते ।।

अव :- अथाऽनुमानपुरस्सरं पठितसूत्रस्य, व्यख्यानमादावारभ्यते । शब्दार्थात्मकप्रपञ्चस्य स्वयम्भुत्व-स्वभावाभ्यां, न कर्त्रपेक्षेति वादिनो निराकरणपूर्वकमनुमानेन जगत्कर्तारं शिवं साधयित्वा, अनन्तरमनन्तेश्वरमुखेन क्रियमाणं अशुद्धाध्वकृत्यञ्च प्रथमद्वितीयसूत्राभ्यामाह ।।

१ - सूत्रम्

सू - स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता स हत्वेतत्सृजत्यस्मात्प्रभुर्हरः ।।

२ - सूत्रम्

सू- अन्यस्सन् व्याप्तितोऽनन्यः कर्ता कर्मानुसारतः ।।
करोति संसृतिं पुंसामाज्ञया समवेतया ।। इति ।

पदविभागः :- जगतः कर्ता, अस्ति, स्त्री पुंनपुंसकादित्वात्, कार्यदर्शनात्, सः, एतत्, हत्वा, सृजति, अस्मात्, प्रभुः, हरः, इति योजना ।। १ ।।

कर्ता, अन्यस्सन्, व्याप्तितोऽनन्यः, पुंसां कर्मानुसारतः, समवेतया, आज्ञया, संसृतिम्, करोति इति योजना ।। २ ।।

ननु !

श्लो - प्रमाणव्यतिरिक्तत्वादप्रमेयमिति स्मृतम् ।
अनिर्देश्यमलक्ष्यत्वाद्वाङ्नोतीतगोचरम् ।।

इत्यादि प्रमाणगोचरत्वप्रतिपादकागमवचनबाहुळ्यादनुमानेन परतत्त्वं साध्यत इत्युक्तिर्विरुद्धेति चेत् सत्यम्। उपाधिरहिते निर्विकल्पज्ञानस्वरूपे

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

अनर्वाचीनपदे परतत्त्वे तथाभवतु महत्वमस्माभिरनुमानेन साध्यत इत्युक्तिः बैन्दवादिसहितसविकल्पकसार्वज्ञत्वादिषाड्गुण्य विशिष्टार्वाचीनलय-भोगाधिकारधर्मलक्षितशक्ताभिधानकपदान्येव।

तदुक्तं पुष्पदन्तस्तवे –

श्लो – अतीतःपन्थानं तव च महिमा वङ्मनसयो।
रतद्व्यावृत्याऽयं चकितमभिधत्ते श्रुतिरपि।।
स कस्य स्तोतव्यः कतिविधगुणः कस्य न विषयः।
पदे त्ववर्वाचीने पतति न मनः कस्य स वचः ।।

पौष्करे –

श्लो – लयभोगाधिकारात्मव्यापारत्रयलक्षितः।
स्वभावादच्युतश्शक्तः सपतिः परिपठ्यते ।।

पदार्थः पतिसंज्ञितः, इत्यतो न विरोधः। जगतः कर्तास्तीति प्रतिज्ञा। गच्छति, नश्यतीति व्युत्पत्या जगच्छब्दो निष्पन्नः। तज्जन्मादिकं कुतसापेक्षम्।

तथा च प्रथमसूत्रं मृगेन्द्रे –

श्लो – जगज्जन्मस्थितिध्वंसतिरोभावविमुक्तयः।
कृत्यं सकारकफलं ज्ञेयमस्त्येतदेव हि ।। इति ।।

अत्र प्रथमशब्दप्रपञ्चसाधकहेतुमाह।

स्त्रीपुंनपुंसकादिति, वर्णानां स्त्रीपुम्नपुम्सकलिङ्गाव्ययादि भेददर्शनात्। जडत्वे सत्यनेकत्वात् गुणत्वाच्च, सर्वज्ञादिषाड्गुण्यविशिष्टाच्च प्रयत्नादि शक्तिमत् कर्तृकत्वम्।

तथा च वातुळे –

श्लो – स्त्रीरूपाश्चैव पुंरूपास्तथा चोभयरूपकाः ।
सर्वे च देवतारूपाः प्रत्येकं वर्णरूपकाः ।।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

अजिते –

श्लो – आसीत्पूर्वं हि सर्गादौ ब्रह्मरूपात्पराच्छिवात् ।
शब्दस्ततोऽक्षरस्तस्माच्छब्दराशिरनुत्तमः ।।

पौष्करे –

श्लो – तेषामेका परा योनिः यत्तेजः परमेश्वरम् ।
निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट् ।।
स्वकर्मसहकारी स्यात् कार्यं तस्मात्सहेतुकम् ।
उपादानमतो बिन्दुर्यस्माद्वर्णा न तद्विना ।।
बहुधा संस्थिता वर्णाः कृतका चेतना यतः ।
वर्णाश्च स्वरसंयोगात् पादं तैर्वाक्यमिष्यते ।।
तस्मादर्थः प्रतीतिस्याद् व्यवहारनिबन्धने ।। इति ।।

अर्थप्रपञ्चकसाधकहेतुमाह, कार्यदर्शनादिति । ननु, कारण भुवनभोग्यवस्तूनां कार्यत्वेन दर्शनात् उत्पत्तिमत्वात् कर्तास्तीत्यर्थः ।

यथाऽऽह पराख्ये –

श्लो – मूर्तास्सावयवाश्चैता नानारूपपरिच्छिदाः ।

मृगेन्द्रे –

श्लो – अथानादिमलोपेतस्सर्ववित्सर्वकृच्छिवः ।

न्यायशास्त्रे च –

श्लो – नमामि परमात्मानं स्वतस्सर्वार्थवेदिनम् ।
विद्यानामादिवक्तारं निमित्तं जगतामपि ।। इति ।।

पौष्करे –

अस्योदाहरणम् ।

श्लो – विवादाध्यासितं विश्वं विश्ववित्कर्तृपूर्वकम् ।
कार्यत्वादावयोस्सिद्धं कार्यं कुम्भादिकं यथा ।। इति ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

इह धर्मेण साध्यते क्वचित्कार्येण कारणं कारणेन क्वचित्कार्यं क्वचदाम्नाय-दर्शनात् इति मतङ्गवचनादागमेन जगतः सकर्तृकत्वसिद्धिः। अनुमानञ्च-विचित्ररूपं जगत्, ज्ञानक्रियाशक्तिसाध्यं, कार्यत्वात्, शिवज्ञानक्रियासाध्यरथगो-पुरप्रासादादिवदिति । ज्ञानक्रियाशक्तिसिद्धौ, तद्धर्मी महेश्वरः कर्तेत्यनुमीयते । नन्वनुमानस्य प्रत्यक्षोपवशित्वाद्रसवत्यादौ धूमाग्नी दृष्ट्वा, भूधरे धूमदर्शनात् अग्न्यनुमीतीवच्च। एकत्रैकदा घटादिकं तत्कर्मकारं तत्क्रियाञ्च दृष्ट्वऽन्यत्रापि घटदर्शनात् कुलालकर्तृकत्वादनुमीतीवच्च एकत्र प्रपञ्चक्रियारूपधर्मतत्कर्तारं दृष्ट्वा खलु प्रपञ्चस्य कर्तास्तीत्यनुमेयं, तद्वत् कुत्राप्यदृष्टत्वादिदमीश्वरसाधकमनुमान-सिद्धमितिचेत् तन्न। अनुमानमपि, विशिष्टशिष्टसाधन-सामान्यदृष्टसाधनभेदेन द्विविधः। तयोर्मध्ये धूमाग्न्यनुमानम्, घटात्कुलालाच्चेत्यादिविशिष्टसाधनम् । पिशाचग्रस्तास्तेहि न दृष्ट्वा तदाविष्टग्रहाऽदर्शनेऽपि,तच्चेष्टया ग्रहाऽनुमानं सामान्यदृष्टसाधकम्। तद्वत्सामान्यदृष्टसाधनदर्शिधर्मानुमानेश्वरसाधकानुमानं सिद्धम्। तथाहि। दृष्टं, सामान्यतो दृष्टमिति तत्साधनं द्विधा।।

किरणे –

श्लो – तत्राद्यमक्ष(क्षि)योग्यस्य पदार्थस्यानुमानकम्।
अन्यत्स्वतोऽप्यदृष्टस्य पदार्थस्यानुमानकम्।।
तथैव पशवः केचित् ग्रहग्रस्ता विकुर्वते।
विकारास्तत्र दृश्यन्ते ग्रहाः क्वापि न दृश्यते ।। इति।

अथ मायाकर्मणोरचेतनत्वात्, कालस्य जडत्वे सत्यनेकतया कार्यत्वात्, जीवानामाणवमलरुद्धः, क्रियाशक्तिमत्वात्, हिरण्यगर्भनारायणकालरुद्राणां सकलरूपमहेश्वराज्ञोद्भूतत्वेन गुणत्रयाधिष्ठिता शुद्धाध्वकृत्यस्येव कर्तृत्वात्, शिव एक एव, शब्दार्थप्रपञ्चयोरादिकर्ता। ननु ब्रह्मा जगत्कर्ता नारायणो जगत्कर्ता रूद्रो जगत्कर्ता इति श्रुतिचोदित्वादत्र कथं तदुदासेन, कथं शिवस्येव कर्तृत्वमुच्यते। सत्यम्, श्रुतौ कलशाक्षमालाशङ्खचक्रशूलडमरुकादि चिह्नानामनुक्तत्वात्, ब्रह्मादीनां भिन्ननिष्कळः परशिवयोगेन व्यपदिश्यते । नोचेदन्योन्यविरोधात्

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कृत्यमेव न सङ्गच्छेत । किञ्च, रुद्र एक एव द्वितीयो नेत्यादि श्रुतिविरोधाच्च, तस्माद्यौगिकः । 'शिव एवादिकर्ता सकलरूपभृत्', ब्रह्मविष्णुरुद्राणां को भक्तेभ्यो लीलानित्यविभूत्योः प्रदायकात्वादीश्वराभिदायकश्शिव एव आदिकर्ता सकलरूपभृत्, ब्रह्मविष्णुमहेश्वरादयस्त्वान्तरकर्तारः ।

तदुक्तं पराख्ये –

श्लो – एको हि नामगैर्भेदैः स्थितस्स परमेश्वरः ।
ब्रह्मत्वाद्ब्राह्मणत्वाच्च ब्रह्मैव शिवयोगतः ।।
विष्णुः प्रभवशीलत्वात्प्रभवो जगतां प्रभुः ।
रुजं द्रावयते यस्मात्तेन रुद्रो रुजाक्षयात् ।।

पौष्करे –

श्लो – तथा प्रथमसृष्टेऽस्तु समस्तोपाधिवर्जितः ।
कर्ता महेशोऽवशिष्टाः प्रवृत्ताशेषशक्तिकाः ।। इति ।

स, इति, उक्त धर्मधर्म्यनुमानेन सिद्धः कर्ता, एतत् हत्वा सृजतीति, वर्तमान प्रपञ्चमुपसंहृत्य, हर एक एवाशिष्टतया स्थित्वा, पुनःप्राग्वत्, सृष्ट्यादिकृत्यं करोतीति ।

तदुक्तं मृगन्द्रे –

श्लो – भोगसाधनमाश्रित्य कृत्वा कारणसंश्रयम् ।
तच्च स्वात्मकमाक्रम्य विश्रमायावतिष्टते ।।
हर एक एवावशिष्ट इत्यर्थः सममिति वचनम् ।

देवीकालोत्तरे –

श्लो – अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं तं न पश्यामि यो ममेति ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मृगेन्द्रे पुनरपि –

श्लो – भविनां भवखिन्नानां सर्वभूतहितो यतः ।
स्वापावसानमासाद्य पुनः प्राग्वत्प्रवर्तते ।।

ननु, जीवानां जननमरणयातायातश्रान्तिविश्रान्त्यर्थं, उप सम्हारोऽस्तु, पुनः प्रपञ्चकारणं, किमर्थमित्याशङ्कायामुत्तरवचनम् –

किरणे –

श्लो – मुक्त्यर्थं स्वपशुर्बद्धो नान्यथा सास्य जायते ।
यावच्छरीरसंश्वेतो न सञ्जातो न भोगभुक् ।।
मायेयं तत्पुनस्तस्य तदाभावान्न भुक्तिभाक् ।
तेन तेन स्वतन्त्रत्वात् मलिनो मलिनीकृतः ।।
यदा वस्त्रं सदो भूतान्मलान्येन विशुध्यति ।। इति ।।

तस्मात्प्रभुर्हर इति, उक्तरीत्या परिशिष्टो जगत्स्वामी हर एव पुनः सृष्ट्यादि कर्ता, एवं पूर्वोक्तधर्मधर्म्यनुमानेन सिद्धः, पतिः तटस्थः, तस्य लक्षणमुत्तरत्र वक्ष्यामः। अस्य पत्युः परस्य, परमात्मा, परब्रह्मरूपः, परशिवः इति लाक्षणिकवचनानि ।

देवीकालोत्तरे –

श्लो – निरञ्जनं निष्प्रतिमं निरीहमदृश्यमग्राह्यमचिन्त्यरूपम् ।।

अचिन्त्य विश्वसादाख्ये –

श्लो – परमं शाश्वतं सत्यज्ञानानन्दसुखात्मकम् ।
वाच्यवाचकराहित्यं वाङ्मनोऽतीतगोचरम् ।।

वातुळे –

श्लो – शिवं परात्परं सूक्ष्मं नित्यं सर्वगताव्ययम् ।

श्लो – अचिनितमनौपम्यमप्रमेयमनामयम् ।
एतत्परशिवांतर्भूतपञ्चशक्तीनां, पुनः प्रपञ्चोत्पत्तिनिमित्तमाविर्भावः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथा-

श्लो - तच्छिवे तु पराशक्ति सहस्रांशात्तु जायते।
तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः ।।
तच्छक्तेस्तु सहस्रांशादिच्छाशक्तिसमुद्भवः।
तस्याश्शक्तेः सहस्रांशात्क्रियाशक्तिसमुद्भवः।।
बिन्दुरूपं पराशक्तिर्नादस्यादादिरिष्यते।
शक्तिरिच्छेति विज्ञेयाश्शब्दो ज्ञानमिहोच्यते।।
वाग्भवस्यात्क्रियाशक्तिरिति।। इति ।।

एवं पञ्चशक्त्याविर्भावभिन्ननिमित्तोपादानकारणात्मकं, कर्ता शुद्धाऽशुद्धप्रपञ्चकृत्यनिमित्तं, शक्तोद्युक्तप्रवृत्तभेदैस्त्रिवधो भवति।

तथा च मृगेन्द्रे -

श्लो - शक्तोद्युक्तप्रवृत्तश्च कर्ता त्रिविध इष्यते।
शक्तेःप्रवृत्तिभेदेन भेदस्तस्योपचारतः।। इति।
अथैतेषु प्रथमं शक्ति संज्ञकपदे, स्थानलक्षणवचनानि।

पौष्करे -

श्लो - उपसंहृतकार्यात्मा यदा बिन्दुव्यवस्थितः ।
तदा प्रयात्ययं तत्त्वं शिवतत्त्वं तदेव हि ।।
विद्यातत्त्वं वदन्नेदं सन्ततत्वादि लक्षणम्।।

किन्तु - स्वभुक्रियाशक्तिकिरणात्मकं, पूयं व्यापकं नित्यमचलं सर्वतो मीत्वरम्।

श्लो - तस्मिन्विशिष्टे चिन्मात्रे व्यापकत्वादि धर्मवान्।
अन्योन्यतश्च तच्छक्तेः समवायस्थितश्शिवः।।
शक्तोऽयं शक्तयो यस्मादुद्योगादि क्रियाश्च्युताः ।
शिव एवावतिष्ठन्ते निष्कलश्च स एव हि ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निरपेक्षसर्वज्ञत्वादि, षाड्गुण्यपरिपूर्णः तथा च –

सर्वज्ञानोत्तरे –

श्लो – सर्वज्ञता तृप्तिरनादिबोधस्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहस्स शिवत्वमेति ।।

अथ तस्य, समवायलक्षणवचनानि –

श्लो – निष्कलस्था पराशक्तिरचला सर्वतोमुखी ।
ससूक्ष्मा निर्मला नित्याऽऽनन्दा निर्वाणदा परा ।।
सा बिन्दुर्भाति तत्त्वेषु सर्वतत्त्वेषु चैव हि ।
तयाधृतं जगत्सर्वं एकयाऽनेकरूपया ।।

एतादृक्छक्तिमान्, प्रपञ्चकर्ता, ननु ते लोके भवतामेव क्रियाकर्तृत्वदर्शनात्, ईश्वरस्य तदभावात् कृत्यं कथं सम्भवतीत्याशंक्य तत्परिहरति –

पौष्करे –

श्लो – सदेहस्यापि कर्तृत्वं सर्वव्यापि यदीष्यते ।
अदेहस्यापि कार्यत्वाद् व्याप्तं कर्त्रान्तरेण तत् ।।
तस्य देहादयोऽप्येवमित्यवस्था न कुत्रचित् ।
यथा कालोह्यमूर्तोऽपि दृश्यते फलसाधकः ।।
एवं शिवो ह्यमूर्तोऽपि कुरुते कार्यमिच्छया ।
अदेहस्यापि कर्तृत्व स्वदेहप्रेरणे यथा ।।

मृगेन्द्रे –

श्लो – साधारे यःपरार्थेऽस्मिन् निराधारेऽपि कृत्यकृत् ।
अन्तरिक्षे निराधारे दृष्टश्शाखादिकम्पकृत् ।। इति ।

भवतु तथा, शिवस्य पूर्वं, निर्वीकारित्वं प्रतिपादितम् । इदानीम् अन्योन्यविरुद्धपञ्चकृत्यकर्तृत्वे सुतरां विकारित्वप्रसङ्गश्च, इत्याशङ्कायाः परिहारवचनानि –

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पौष्करे –

श्लो – कर्तृत्वं द्विविधं विप्राः सङ्कल्पात्करणादपि ।
न हि सङ्कल्पमात्रेण कुलालैः क्रियते घटः ।।
शिवस्सङ्कल्पमात्रेण बिन्दुक्षोभकरस्सदा ।
स्वव्यापारविशेषेण येनायं विकृतो भवेत् ।।
समस्तोपाधिशून्यत्वान्निर्मलत्वाच्च हे द्विजाः ।
य एवोपाधिमन्तस्ते विकृताः कार्यजन्मनि ।।
ततश्च नो विकारित्वं कर्तृत्वेन विरुध्यते ।
समस्तोपाधिशून्यत्वात्कर्त्यत्वं तस्य नेष्यते ।।
कर्णत्वप्रतिबन्धत्वादुपाधेस्तद्वियोगतः ।
भवेत् प्रत्युत कर्तृत्वं प्राध्वर्याय मुनीश्वराः ।।
यथार्को दिनचेष्टानां सन्निधेरुपकारकः ।
तथा सन्निधिमात्रेण विदधात्यखिलं शिवः ।। इति ।

अथ सृष्टिक्रमः, कर्ता एवमेकोऽपि शक्तिद्वाराऽनेको भूत्वा, शुद्धाऽशुद्ध-मायाविशिष्टतया, भिन्ननिमित्तोपपादकस्सन्, प्रपञ्चोत्पत्यादिकं करोति ।

तथा च देवीकालोत्तरे –

श्लो – भूतानि चाहं स्थिरजङ्गमानि यावन्ति चान्यान्यहमेवतानि ।
नाशोऽहमेवास्मि चराचरस्य पिता च माता च पितामहेति ।।

अथ प्रथमं, शब्दोत्पत्तिक्रमो यथा –

श्लो – ततस्त्वहर्मुखे जाते शिवशक्त्या समागमात् ।
शिवे चैवच सर्वेषामुत्पत्यर्थमनन्तरम् ।।
तदभूत् क्षो(क्षु)भितं विश्वकारणं योगमायया ।
तत्क्षोभतस्समुत्पन्नं शास्त्रं नादस्वरूपतः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रवृत्तं तदधः किञ्चद्विबुधाकारतश्शिवम् ।
सबिन्दुरिति विख्यातश्शरश्चन्द्रसमप्रभः ।।
स चतुर्था समाख्यातो ज्योतिषां परमो निधिः ।
शिवेच्छ क्षोभितो बिन्दुस्तदधश्शक्तिरम्बिका ।।
शशाङ्कशकलाकारं शक्तित्रयमतस्ततः ।
वामा ज्येष्ठा स्थिता रौद्री नुन्ननागेन्द्रसन्निभा ।।
वामा वै दण्डवज्येष्टा रौद्री भृङ्गाभतटस्थिता ।
सा माया पररूपेण जयाद्या परिकीर्तिता ।।
जया च विजया चैव अजिता च पराजिता ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।।
इन्दिका(रा) दीपिका चैव रोचिका मोचिका परा ।
व्योमरूपात्वनन्ता च नाथानानाश्रिता तथा ।।
आविर्भावमिदं सर्वं शिवाद्यवनिगोचरम् ।
ताश्च सर्वाः समुत्पन्नास्त्रिंशद्वर्णास्सविंशकाः ।।
शिवस्यासंस्थिता रौद्री वक्त्रं वामा प्रकीर्तिता ।
अम्बिका बहुसङ्काशा ज्येष्टा वै दण्डवत् स्थिता ।।
अकार एव विख्याता आकारं शृणुत द्विजाः ।
एष एव द्वितीयेन दण्डेनाग्रस्थितेन च ।।
शेषाणां लक्षणं नोक्तं मया विस्तारभीरुणा ।
वैखरी श्रोत्रविविधा स्थूलवर्णपरिग्रहा ।।
स्थानेषु विधृते वायौ प्रयोक्तौ रूपकारिणी ।
बुध्वा वर्णानुसन्धानपूर्वमर्थस्य वाचिका ।।
प्राणवृत्तिमतिक्रान्ता वागेषा मध्यमाह्वया ।
वर्णरूपानुसन्धानविरहांतस्समुज्वला ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मायूराण्डरसो यद्वन्निर्विशेषार्थधारिका ।
पश्यन्ती वागियं ज्ञेया तृतीया शिवशासने ।।
सूक्ष्मा चिदेकशरणा निवृत्ता शेषशक्तिका ।
वैखर्याः कारणं मध्या पश्यन्ती मध्यमां प्रति ।।
पश्यन्त्याः कारणं सूक्ष्मा निर्विकल्पस्वरूपिणी ।
अन्तरेव स्थितास्तिस्रे बहिरन्या(न्त्या) व्यवस्थिता ।।
नु(सु)गोपालङ्गना बाला म्लेच्छा प्राकृतभाषिणः(णी) ।
अन्तर्बालगतास्सत्वा नित्यं जल्पन्ति ता गिरः ।।
आभ्यो न परमो बन्ध आभ्यो मुक्तिस्तु नापरा ।
तं निवृत्य विनाभूता दृक्क्रियावारको यतः ।।
विविक्ता निर्मला तेभ्यः वुद्गला स्वां न कुत्रचित् ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ।।
यस्यां दृष्टस्वरूपायामहङ्कारो निवर्तते ।
भित्वा यं बोधखड्गेन निर्गच्छत्यविशङ्कितः ।।
केवलं परमानन्दो धीरोतीत्योदितः प्रभुः ।
नास्तमेति न चोदेति न श्रान्तो न विकारवान् ।। इति ।

अथ शक्तो विज्ञानकेवलेषु, पक्वात्मतयानु गृहीत तीव्रतरशक्ति-निपातान् परममुक्तान् कृत्वा, तीव्रशक्तिनिपातान् अपरमुक्तिमप्रापय्य, तेषु भोगाय शुद्धमायाशक्त्यभिव्यक्तिं कृत्वा । पूर्वोदितविज्ञानानन्दमयकोशेन बद्ध्वा, तन्मध्ये विज्ञानकलानां रुद्राणूनां, तन्वादिकं स्वयमुल्लेखनात्मना सम्पाद्योद्युक्तात्मक सदाशिवमुखेन, स्थूलतया करोति ।

अधैतत्सदाशिवरूपः यथा वातुळे -

श्लो - यतीनां योगिनाञ्चैव ज्ञानिनां मत्रिणां तथा ।
ध्यानपूजानिमित्ताय निष्कले सकलं भवेत् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सौवीर्यं नास्ति तद्देहे मांसास्थिरुधिरं न हि।
इन्द्रचापमिवाकाशे दर्पणे प्रतिबिम्बवत्।।
तद्रूपं वै समासेन सादाख्यमिति कीर्तितम्।
सादाख्यं पञ्चधा प्रोक्तं तेषां लक्षणमुच्यते।।
पराशक्त्यादि शक्तिभ्यस्सादाख्यानां समुद्भवः।
प्रथमं शिवसादाख्यममूर्तं तु द्वितीयकम्।।
तृतीयं मूर्तिसादाख्यं चतुर्थं कर्तृनामकम्।
पञ्चमं कर्मसादाख्यमुक्तं सादाख्यपञ्चकम्।।
योनिलिङ्गप्रकारेण जगत्सृष्ट्यर्थकारणम्।
सदा संयोगभावत्वात्कर्मरूपमुदाहृतम्।।
एतच्छिवमयं लिङ्गं सर्वतत्त्वालयं स्मृतम्।
लिङ्गे तु जायते तत्र जगत्स्थावरजङ्गमम्।।
तस्माल्लिङ्गं विशेषेण कर्मरूपमुदाहृतम्।
कर्मोदये तु सृष्टिस्स्यात्कर्मान्ते संहृतिर्भवेत्।।
एतत्कर्मेशरूपं तु सृष्टिस्थितिलयावहम्।। इति ।

किञ्च, परमशिवेन, स्वसमवेतचिच्छक्तिविशिष्टबिन्दूपादानकृतयो-त्पादितसंज्ञारूपशब्दात्मकम्, अपरज्ञानात्मकं, सदाशिवदेवो बुद्ध्वा, वेदागम-षडङ्गमीमांसन्यायशास्त्रपुराणधर्मशास्त्रऽयुर्वेदगान्धर्वाऽर्थशास्त्ररूपाः अष्टादशविद्याः प्रणीतवान्।

तदुक्तं स्कान्दे -

स्लो - अष्टादशानां विद्यानामेतासां भिन्नवर्त्मनाम्।
आदिकर्ता शिवस्साक्षाच्छूलपाणिरिति श्रुतिः।।

मृगेन्द्रे -

श्लो - सृष्टिकाले महेशानः पुरुषार्थप्रसिद्धये।
विधत्ते विमलं ज्ञानं पञ्चस्रोतोऽभिलक्षितम्।। इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एवं भूतस्सदाशिवः त्रिष्वध्वसुश्रेष्ठभूतशुद्धाध्व सृष्ट्यानदिकं करोति। तद्यधा शक्तानुगृहीतावशिष्टतीव्रतरशक्तिनिपातवतो, विज्ञानकेवलाननुगृह्य, ज्ञानक्रियाभिव्यक्तिमन्तं कृत्वा, तत्तारतम्येन, तेषां बोधबैन्दवोदितशुद्धविद्येश्वर-सादाख्यतावेषु, तनुकरणादि सृष्ट्यादिकं करोति।

तथाहि –

श्लो – भोगाधिकारा या शक्तिरभिव्यक्तेह दीक्षया।
येषां तेषांतु भोगार्थं शिवेन परिकल्पितम्।।
तत्त्वं सदाशिवं तत्त्वं शिवतत्त्वं च निर्मितम्।
भोगतत्त्वे स्थितिर्यस्माद्वस्तुतस्तु तयोर्द्वयोः ।।
व्यक्ताधिकारशक्तीनां भोगार्थं तत्त्वमैश्वरम्।
तात्त्वं विद्याह्वयं किन्तु पुंसां स्थूलादिकारणम् ।।" इति ।

एवं शुद्धाध्वकृत्यमुक्त्वा अनन्तेश्वरमुखेन क्रियमाणमशुद्धाध्वकृत्यं प्रतिपाद्यते।

तदुक्तं मृगेन्द्रे –

श्लो – शुद्धेध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः।
बिन्दुं शक्त्या पराक्षोभ्य शुद्धाध्वानं शिवोऽसृजत्।।
मायां विद्येशमार्गेण तत्वाद्यं चासृजत्पुनः।
वामादि शक्तिभिर्युक्ता शिवेच्चाविधिचोदितः।।
विद्याराजाधिराजेशो मायां विक्षोभ्य मन्त्रराट्।। इति ।
एतदनन्तेश्वराभिधानकमहेश्वररूपम् ।

यथा वातुले –

श्लो – कर्मेशस्य सहस्रांशान्महेशस्य समुद्भवः।
महेशं सकलं विद्यात्सृष्टिस्थितिलयात्मकम्।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पञ्चविंशतिभेदेन तन्मूर्तौ पञ्चविंशतिः ।
नानारूपधरो देवो ननाभेदसमन्वितः ।।
नानाचिह्नसमो भेदो नानालीलामनोहरः ।
स्थानयानसमाशीननृत्तकस्सुखसाम्यकः ।।
अनेकाकारसंयुक्तो देवदेवो महेश्वरः ।
जटामकुटसंयुक्तः एकवक्त्रस्त्रिनेत्रकः ।।
सर्वाभरणसंयुक्तश्चैकपद्मासनस्थितः ।
वरदाऽभयहस्तश्च मृगी परशुधारकः ।।
ईशरूपमिदं प्रोक्तमिति ।।

एतदनन्तेश्वरमुखेन क्रियमाणम्, अशुद्धाध्वकृत्यमाह ।

व्याख्या : – कर्ता अन्यस्सन् व्याप्तितोऽनन्य इति, उपादानजडरूप मायायाः, सच्चिदानन्दरूपनातेश्वरो विरुद्धधर्मतया भिन्नोऽपि, कार्योन्मुखस्वसमवाय-चिच्छक्तिद्वारा मायाव्याप्तित्वं भिन्नो भूतेत्यर्थः, पुसां कर्मानुसारत इति, मायायाः स्त्रीत्वव्यवहारात्तद्विलासानुभवित्वाद्वा प्रपञ्चकञ्चुकात्मकपुंस्तत्त्वतत्त्वसम्बन्धाद्वा पुरुषत्वव्यपदिष्टानां पशूनां धर्माधर्मात्मककर्मपरिपाकानुगुण्येनेत्यर्थः, समवेतया आज्ञयेति, स्वस्मिन् समवायसम्बन्धेन वर्तमानज्ञानक्रियात्मकशक्तिकरणेन संसृतिं करोति । अभिन्ननिमित्तोपादानतया, तनुकरणादिकं सृजतीत्यर्थः । कर्ता अन्यस्सन् व्याप्तितोऽन्य इति, पदेन, प्रपन्चो ब्रह्मविवर्ततः, निरुपादानकं, केवलं ब्रह्मोपादानकं, केवलं माया उपादानकं, ईश्वरनिमित्तमात्रकं परमाणूपादानम् इत्यादि व्यावृतिपुरस्सरं, मायाविशिष्टेश्वरोपादानक इति बोद्धव्यः । कर्मानुसारत इति पदं वैषम्यनैर्वर्ण्यदोषव्यावर्तकं, पुंसामिति बहुवचनादि निर्देशं केन साध्यत इत्याशङ्कायाः, पूर्वोत्तरवचनानि ।

पौष्करे –

श्लो – आत्मनो बहवः प्रोक्ताः बहुत्वं केन गम्यते ।
नाध्यक्षगम्यमानत्वान्नानुमाविषयं ततः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भेदस्य मेयधर्मत्वादात्मा मेयः कथं भवेत् ।
न हेतुसाधनाभावोऽप्यात्मभेदोवपादकः ।।
आत्मनो बहवो जन्म मरणादिविभेदतः ।
जन्मनाशोदया धर्माः दृश्यन्ते भिन्नवस्तुषु ।।
ततन्तुजन्मनाशाद्याह्यात्मनो भेदकाः स्थिताः ।
न च देहस्य जन्माद्या देहाद्यैस्सहजात्मनात् ।।
देहाद्यैर्यदि जन्मादिः न चाचैतन्यदर्शनात् ।
तद्देहे जातबालानामपि चैतन्यमिष्यते ।।
चैतन्येन वियुक्तस्सन् देहादिरुपजायते ।
जन्मादि भेदवन्तोऽतो देहाश्चिद्भेदसाधकाः ।।

ननु श्रुतावात्मैकत्वस्य प्रतिपादितत्वादत्र नानात्वकल्पनं विरुद्धमितिचेत् सत्यं, शिवजीवयोस्सत्यज्ञानस्वरूपत्वादभेदः । भेदस्तु नादावेव निजवृत्तिभेदात् नानात्वात् जीवनानात्वमिति न वैदिकविरोधः ।

तदुक्तं कामिके –

श्लो – ज्ञानं तत्र द्विधा प्रोक्तं वृत्तिरूपं निजं तथा ।
निर्विशेषं निजं शुद्धं नैवोपप्लवतो धृवम् ।।
वृत्तेरमी च शेषास्युस्सांविवदाद्याश्च सुव्रत ।
वैदिकं शैवमित्युक्तं शैवं वैदिकमैव च ।।
वैदिकान्तर्गतं भूतं शैवं शैवात्तदप्यथेति ।। इति ।

अथ कर्मप्रतिपादकवचनानि –

श्लो – अविशिष्टे तु भोक्तृत्वे भुञ्जते विद्धि केचन ।
केचनावीचिमुख्येषु न स्यादेतदहेतुकम् ।।
यत्तत्र हेतुकर्मेति मन्तव्यं मुनिपुङ्गवाः ।
उभयोःकृतिसाम्ये तु कश्चिद्धान्या नियच्छति ।।
न कश्चिदपरस्तस्य कर्मकारणकोद्विजाः ।। इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्य लक्षणवचनानि –

मृगेन्द्रे –

श्लो – कर्मव्यापारजातत्वाददृष्टं सूक्ष्मभागतः ।
जनकं धारकं भोग्यमाध्यात्मादि त्रिसाधनम् ।।
स्वापे विभागमध्येति तत्सृष्ट्यावुपयुज्यते ।
मायायां वर्तते चान्ते नाऽभुक्तं क्षीयतेऽपि च ।।

पौष्करे –

श्लो – कर्मेह त्रिविधं दृष्ट्वा दृष्टजन्मोपभोग्यकम् ।
तथानियतकामोपभोग्यं चेति समासतः ।।
आयुर्योगो गळूच्यादि सिद्धो मन्त्रप्रभावतः ।
तज्जन्मन्येव फलदो दृष्टभोग्यं तदुच्यते।।
स्वाराज्या वीचिभोग्याय देहान्ते पुण्यपापयोः ।
अदृष्टवेदनीयं तत्कर्मोक्तं शिवदर्शने ।।
अश्वमेधो द्विजवधः कृतः कालेन भोगतः ।।
अथ मायाप्रमाणवचनानि –

पौष्करे –

श्लो – नाभूच्छक्तिरुपादानं चिद्रूपत्वाद्यथा शिवः ।
परिणामोचितः प्रोक्तः चिद्रूपस्य न युज्यते ।।
चिदोर्विवर्त एवोक्तः तथात्वे कार्यशून्यता ।
सर्वप्रमाणसंसिद्धचिद्विवर्तं कथं जगत् ।।
निश्शेषाश्शेषकार्याणां कारणत्वाद्वदन् यथा ।
यन्नित्यश्च यथा तन्तु तस्यां मायाप्यनश्वरी ।।
अनित्यैषा यदिष्येतो कर्मणां कुत्र संस्थितिः ।
न बिन्दुः कर्मणा स्थानं, बिन्दुः कर्मोत्तरो यतः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न चात्मनि स्थितिस्तेषां यस्मादात्मा जडो भवेत् ।
तस्मात्तत्वात्मिका माया स्थिता विश्वस्य कारिणी ।।
अथ मायालक्षणवचनानि –

स्वायम्भुवे –

श्लो – मायातत्वं जगद्बीजमविनाश्यव्ययात्मकम् ।
अविवेकाकुलं सूक्ष्मम् अनाद्यव्ययमीश्वरम् ।।
माया तु द्विविथा ज्ञेया सूक्ष्मस्थूला मुनीश्वराः ।
अव्यक्ता हि सुसूक्ष्मत्वात् व्यक्तता स्थूलरूपता ।।
कारणं कार्यता सूक्ष्मतराव्यक्तेतरावृतः ।
अन्यधा भावहेतुत्वदियं मायेति कीर्तिता ।।
आत्मतत्त्वतिरोधानात्तम इत्युच्यते बुधैः ।
विद्यानाश्यत्वतो विद्यामोहस्तकारणत्वतः ।।
सवैलक्षण्यं दृष्टेयमसदिद्युदिता बुधैः ।।
इति सृष्टिक्रमः –

ईश्वरेण मायायां विक्षोभितायां यथा तीव्रवायुना ताडने तदविनाभूतया समुद्रात् सञ्जातवत्तदङ्गत्वेन बुद्बुदशीकरादयस्तेन साकं वर्तते, तथा ईश्वरसमवेतकार्योद्युक्तचिच्छक्तियुक्तमायातस्तदविनाभावतयाख्यं जाततनुकरणादिकं ताभ्यां सहवर्तन्ते, सदाशिवेच्छाविनियुक्तविद्येश्वरीसमवेतचिच्छक्तियुक्तमायाविना भूततयोत्पन्नतावादि क्रमो यथा ।।

कामिके –

श्लो – मायाचिद्योगमायादि येन केनाकुलीकृतः ।
ततः कालं प्रसूयेत रागविद्येकला पुनः ।।

पौष्करे –

श्लो – मायातो द्विविधा सृष्टि स्थूलं सूक्ष्मात्मिकेत्यपि ।
दृक्भक्तिव्यञ्जिका सूक्ष्मा स्थिता तत्त्वात्मनाऽऽत्मनि ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्थूला भुवनरूपेण शरीराद्यात्मना स्थिता ।
सूक्ष्माः कलादयः पूर्वं स्थूला बध्नन्त्यतस्ततः ।।
कला विद्या च रागश्च कालो नियतिरेव च ।
पञ्चैतानि च तत्त्वानि माये यानि द्विजोत्तमाः ।।
ग्रहणाभावतस्तस्य ग्राहकश्शून्यवत् स्थितः ।
तन्निवृत्यर्थमादौ तु मायतो जायते कला ।।
ततो विद्याकलातत्वादभूद्भेदार्हमात्मनः ।
कलातो जायते रागः सद्यःपुंसां प्रवृत्तये ।।
कलादिभिस्त्रिभिस्तत्त्वैः प्रवृत्तपुरुषं तथा ।
लवतृट्यादिभिः कालं कलयत्यात्मवृत्तिभिः ।।
ताश्च भौवनदेहोर्ध्वमेवं यस्मात्क्रिया तदा ।
अतीतवर्तमानैष्यं वृत्तीनां कारणं क्षयात् ।।
सकाल इति मन्तव्यो भोग्यार्थोत्पादको नृणाम् ।
भोगा याभिः प्रवृत्तस्य कलाविद्यादिवृत्तिभिः ।।
कर्मणामार्जितानां तु फलोपहरणे सति ।
तद्विनाशे प्रवृत्तेयं नियतिश्शिवशासने ।।
पञ्चकञ्चुकसम्युक्तं प्रकृतिं भोक्तुमुद्यतः ।
अविद्यादिसमायुक्तं पुरुषः परिकीर्तितः ।। इति ।

अथ मायासूत्रतयोत्पन्नप्रकृतिं श्रीकण्ठः परमेश्वरः कलातः स्थूलात्मकत्वेनोत्पाद्य, ततः शुद्धाध्वप्रपञ्चं सृष्टवान् ।

तदाह पौष्करे –

श्लो – अथ प्रकृतितत्त्वं तु क्रमायातं निरूप्यते ।
तच्च मायोद्भवं यस्मात् कलातस्थूलतां गतम् ।।
गुणादिक्षितिपर्यन्ततत्त्वं जातं यतो भवेत् ।
तदव्यक्तमिदं प्रोक्तं मतं श्रीकण्ठविक्रमैः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथ प्रकृतितत्त्वं तु गुणतत्त्वं व्यजायत ।
तत्त्वादयस्समं ह्यस्मात्प्राप्ताः तत्त्वं गुणात्मकम् ।।
क्षोभकोऽत्र महातेजाः श्रीकण्ठोऽनन्तविक्रमः ।
प्रबुद्धः परमेशानः शक्तिसम्पर्कमात्रतः ।।
सत्त्वं रजस्तमश्चेति गुणाः प्रकृतिसम्भवाः ।।

अथ ब्रह्मविष्णुरुद्रमुखेन गुणत्रयमधिष्ठाय, अशुद्धाध्वसृष्ट्यादि कृत्यं करोति ।

तद्यथा सूतसंहितायाम् –

श्लो – ईक्षितापूर्ववद्भूत्वा स्वशक्त्या परया युतः ।
मायाया गुणभेदेन रुद्रं विष्णुं पितामहम् ।।
सृष्ट्वाऽनुप्रविशत्तेषामन्तर्यामितया हरः ।
सृष्ट्वाऽनुप्राविशत्तेषामन्तर्यामितया हरः ।।
तेषां रुद्रं पराभेदं परत त्वश्च भेदवत् ।
करोति सर्गस्थित्यन्तं रुद्ररूपेण सत्तमाः ।।
संहरत्यविशेषेण जगत्सर्वं चराचरम् ।
विष्णुरप्यास्तिकस्साक्षात्पराभेदेन केवलम् ।।
करोति सर्गस्थित्यन्तं विष्णुरूपेण सत्तमाः ।
पालयत्यविशेषेण जगत्सर्वं चराचरम् ।।
ब्रह्मादिमुनिशार्दूलाः पराभेदेन केवलम् ।
करोति सर्गस्थित्यन्तं ब्रह्मरूपेण चास्तिकाः ।।
करोति विवधं सर्वं---- यथा तथा ।।" इति ।

अथ गुणतत्त्वात् बुध्यादिपृथिव्यन्ततत्त्वानामुत्पत्तिक्रमो यथा –

पौष्करे –

श्लो – गुणतत्त्वात्पराबुद्धिरभवन्मुनिपुङ्गवाः ।
रजस्तमोभ्यामुद्भूता वृत्तिसत्त्वेन चोत्कटा ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सा बुद्धिरुदिता तन्त्रे विषयाध्यवसायिनी ।
अत ऊर्ध्वमहङ्कारतत्त्वं संक्षिप्य वर्ण्यते ।।
प्रत्यात्मनियतं तच्च प्रसिद्धमहामत्मकम् ।
मनःपूर्वं तु यस्तत्त्वं यत एवोपजायते ।।
स च त्रिविध उद्दिष्टं प्रथमस्तत्र तेजसः ।
वैकारिको द्वितीयस्यात्तदा भूतादिकः परः ।।
सत्वेनोत्कृष्टभागो यः स तैजस इहोच्यते ।
वैकृतो राजसोत्कृष्टो भूतादिस्तमसा कृतः ।।
तैजसादप्यहङ्कारान्मनोबुद्धीन्द्रियाणि च ।
बुद्धीन्द्रियाणि कथ्यन्ते श्रोत्रत्वक्चक्षुरेव च ।।
जिह्वाघ्राणश्च पञ्चैते सुप्रसिद्धानि तानि च ।
प्रत्यक्षविषयत्वेन तेषां सिद्धेर्न युक्तयः ।।
कथ्यते तान्यहङ्कारादुपजातानि सात्त्विकाः ।
पञ्च कर्मेन्द्रियाणि स्युरहङ्कारात्तु वैकृतात् ।।
कर्मेन्द्रियाणि वाक्पादपाणिगुह्यगुदानि च ।
अहङ्कारात्तु भूतादेर्जाता तन्मात्रसंहतिम् ।।
महाभूतानि जायन्ते क्रमात्तन्मात्रपञ्चकात् ।
आकाशं पवनस्तेजस्तोयं भूरिति संज्ञया ।। इति ।
एभ्यो महाभूतेभ्यो देहाद्युत्पत्तिक्रमो यथा –

मृगेन्द्रे –

श्लो – देहोऽस्थिमांसकेशत्वक्नखदन्तेषु चावनिः ।
मूत्ररक्तकफस्वेदशुक्लादौ वारिसंस्थितिः ।।
सृत्युत्पत्तौ स्रतः पित्ते तेजस्तद्धर्मदर्शनात् ।
प्राणादिसमहीपान्तमेतदश्वत्थसाधनम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रत्यात्मनियतं भोगभेदतो व्यवसीयते ।
सर्वतो युगपद्वृत्तेरनुत्पातादसर्वगम् ।।
भिन्नजातीयमप्येकफलदीपाङ्गवस्तुवत् ।। इति ।

एवं प्रथमद्वितीयसूत्राभ्यां, कर्तुः प्रमाणलक्षणे, मायाकर्मप्रमाणलक्षणात्म, बहुत्वप्रमाणाऽशुद्धाध्वोत्पत्तिक्रमश्च प्रतिपादिताः भवन्ति – इति ।

इति श्रीनिगमागमपारावारगतसदाशिवशिवाचार्यविरचितायां सिद्धान्त-सूत्रवृत्तौ जगदीश्वरप्रमाणलक्षणकृत्यनिरूपणं नाम प्रथमः पटलः ।

सव्याख्याने शिवज्ञानबोधे
तृतीयचतुर्थसूत्रे प्रारभ्येते

अव ।। अथ द्वितीयसूत्रोक्तानां पुंसां प्रमाणलक्षणे, तज्ज्ञानक्रियाप्रतिबन्ध-काणवप्रमाणलक्षणे च, तृतीयचतुर्थसूत्राभ्यामाह –

३ – सूत्रम्

सू – नेतितो ममतोद्रेकात् अक्षोपरतिबोधितः ।
स्वापे निर्भोगतो बोधे बोद्धृत्वादस्त्यणुस्तनौ ।। इति ।

४– सूत्रम्

सू – आत्मान्तःकरणादन्योऽप्यन्वितो मन्त्रिभूपवत् ।
अवस्थापञ्चक स्थोऽतो मलरुद्धस्स्वदृक्क्रियः ।। इति ।

पद ।। तनावणुरस्ति नेतितः, ममतोद्रेकात्, अक्षोपरतिबोधितः,स्वापे, निर्भोगतः, बोधे,बोधृत्वादिति योजना ।। ३ ।।

आत्मान्तःकरणादन्योऽपि, मन्त्रिभूपवदन्वितः, यतः, मलरुद्धस्वदृक्क्रियः, अतोऽवस्थापञ्चकस्थ, इति योजना ।। ४ ।।

व्याख्या :– तनावणुरस्तीति, वर्तमानदेहे, बोधकबोधृत्वेन, अतिसूक्ष्मतयाऽणुरिति व्यपदिष्टे नित्यव्यापकचिद्रूपवानात्माऽस्ति ।, आत्मनोऽप्रत्यक्षत्वादनुमानेन साधयितुं, तनावित्युक्तं यथा –

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पौष्करे –

श्लो – प्रवर्तमानो देहादिश्चेतनाधिष्टितस्सदा ।
स्वतः प्रवृत्तिशून्यत्वाज्जगत्तत्त्वे घटादिवत् ।।
यस्तु प्रवर्तकस्सोऽयमात्मेति परिपठ्यते ।

कामिके च –

श्लो – नित्यज्ञानमयो ह्येषः वृत्तिज्ञानश्च शाश्वतम् ।
व्यापऽकोपि शरीरेऽस्मिन् वर्तते व्यापकः प्रभुः ।। इति ।

ननु पञ्चस्कन्ध सशून्यैव, प्रवृत्तिनिवृत्तिसम्भवात् नित्यज्ञानमयात्मा कश्चित् नास्तीति केचिद्वदन्ति, यथा कामिके "नास्तीत्येके प्रपेदिरे", इति तान् प्रत्यात्मास्तित्वे हेतुमाह ।

नेतितइति । रूपादिपञ्चस्कन्धं दृष्ट्वैतद्व्यतिरेकेणात्मेति कोऽपि नास्तीति वदन्नेवात्मेत्यस्तित्वं सिद्धम् । अथात्मनः देहे स्थितिः कथं तस्य देहाद् व्यतिरिक्तत्वे प्रमाणाभावेन, देह एवात्मा इति लोका यथा वदन्ति ।

यथाह कामिके –

श्लो – तत्र केचिदहं प्राहुः शरीराद्व्यतिरेकिणम् ।
यथा पवनभूवारितैजसं मेलनं भवेत् ।।
इच्छायत्नसमायुक्तं तथा जायेत चेतनम् ।। इति ।

तान् प्रति तन्निराकरणहेतुमाह । ममतोद्रेकादिति, ममतोद्रेकात् अहं देही तस्मात् मम देहस्य इत्यस्य प्रत्यक्षानुमानगमनसम्मतत्वेनाधिक्यात्, देहमधिष्ठाय तत्प्रवर्तकत्वेनात्मा विद्यत इति निश्चीयते ।

अथेन्द्रियात्मवादिनस्त्वात्मनो ज्ञातृत्वलक्षणादिन्द्रियाणां, ज्ञातृत्वादिन्द्रियाण्येवात्मेति वदन्ति ।

यथाह पौष्करे –

चक्षुरादीन्द्रियं परे चेतनं..... ।
मन्यमानास्तत्त्वसिद्धाः मुनिषु केचनेति ।। इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तन्निरासायऽह अथोपरतिबोधित इति–, बाह्येन्द्रियोपरतस्वप्नावस्थायाम् अपि विषयानुभावान्नेन्द्रियाण्यात्मा, अतः आत्मैवेन्द्रियद्वारा शब्दादिविषयपञ्चकं जानाति ।

यथाह कामिके –

श्लो – अहमेव च पश्यामि रसयामि च ..... ।
नह्येतदिन्द्रियात्मत्वे कथञ्चिदुपपद्यते ।।इति ।

अथ निरीश्वरसाङ्ख्याः स्वात्मनः कर्तृत्वभोक्तृत्वे न इति वदन्ति ।

यथाह कापिले–

मूलप्रकृतिरविकृतिमहदाद्याः प्रकृतिविकृतयस्सप्तषोडश कश्चन, विकारो न प्रकृतिर्नविकृति पुरुष इति, तं निरासवचनम् । यथा मृगेन्द्रे नाकत्रेति कर्तृत्वे हेतुमाह ।, स्वापे निर्भोगत इति, आत्मनस्सुषुप्तौ प्रकृतिविकाराणां देहेन्द्रियादीनां विषयानुभवाभावादात्मन एव, कर्त्रृत्वे सम्भवतः ।,

अथ सुषुप्तिरेव आत्मनाशः, प्रबोधे स्वात्मन उत्पत्तिस्तस्मात्, नित्यज्ञानमयः कश्चिन्नात्मा नास्तीति बौद्धैकदेशिनो वदन्ति ।

यथाह कामिके –

श्लो – सुषुप्तौ नेति चेन्नैवं सुषुप्त्यत्रापि विद्यते ।
अन्यथापि सुषुप्तिस्तु केनमानेनुमीयते ।।
तथा सुप्तोत्थितो ब्रूते सुखं हि प्राप्तमित्यहम् । इति ।

अथाह– योगिनो देहे वायौ सति, प्रवृत्तिस्तदभावे अभाव इत्यन्वय-व्यतिरेकाभ्यां, प्राणवायुरेवात्मेति वदन्ति । तौ सुषुप्तौ वायोरुच्छ्वासनिश्वासात्मना वर्तते, विषयदर्शनाभावात् प्राणवायुरप्यात्मा न भवति ।

यथाह कामिके –

श्लो – प्राणवायुर्न चैतन्यमित्यनेनैव भावितम् । इति ।
अथ विषयसर्वस्वग्रहणनिश्चयकृदन्तः करणवर्ग एवात्मेति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मृगेन्द्रे –

न्यायवैशेषिकबौद्धादयो वदन्ति तदपि न देहाद्बहिरन्तःकरणानां, प्रवृत्यभावात्, स्मरणग्रहणनिश्चयानुसन्धानानां । भिन्नक्रियात्वेन चातुर्विध्याच्च–

तदुक्तं कामिके –

श्लो – न शरीराद्बहिस्तस्य प्रवृत्तिः क्वापि लभ्यते ।
अत एव मनो आमा न न बुद्धिर्नाऽप्यहङ्कृतिः ।।
स्मरणात्प्रतिसन्धानम् इति ।

एवं निराकरणान्तःकरणवशो बाह्येन्द्रियवत् रक्तत्वात्माज्ञानक्रियेच्छा व्यक्तिभूमित्वेनात्मान्वित इत्याह –

आत्मान्तःकरणादित्यादिना, आत्मेति–गम्यार्था ज्ञानार्था इतिन्यायेन, सान्तत्यगमन इति धातोर्यन्निष्पन्नात्मशब्दो नित्यज्ञानस्वरूपवान्, यथाह –

कामिके –

श्लो ।। अतस्सान्तत्यगमने व्युत्पन्नोज्ञस्वभावतः ।
परमात्मकसम्भूतस्ततो ज्ञानार्थता यतः ।। इति ।।

एवं भूतात्मा अन्तःकरणादन्य इति, अन्तःकरणबाह्येन्द्रिय–चक्षुराद्यपेक्षया, आत्मनस्सन्निकृष्टं मानसादिकं तस्मादन्य इत्यर्थः । तथापि विषयभोगार्थमन्तःकरण वर्गः सम्बन्ध्येवेत्याह ।

मन्त्रिभूपवदन्वित इति, राज्यैश्वर्यभोगार्थं मन्त्रिसहितमहीपतिरिव, विषयभोगार्थमन्तःकरणवर्गसंयुक्तश्चक्षुरादिबाह्येन्द्रियद्वारा विषयानुभवी भवति ।

यथाह पौष्करे –

श्लो – इन्द्रियापेक्षया शक्त्या तद्वारेणार्थवीक्षणम् ।
अन्तःकरणसापेक्षबाह्येन्द्रियचयेन तु ।।
अन्तःकरणसापेक्षचिच्छक्तेः ध्येयसङ्गतिः ।। इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ननु चिच्छक्तिमदात्मनो विषयदर्शनोऽन्तःकरणसापेक्षं, किमर्थमित्यत आह ।।

मलरुद्धस्सदृक् क्रिय' इति :- आत्मा स्वज्ञानक्रियाशक्त्या नित्यव्यापक एव मलरुद्धत्वान्मन्त्रशक्तिनिरुद्धदाहकशक्तियुक्तग्निवत्, प्रतिहतज्ञानक्रियेच्छादिमान्। केवलावस्थितसत्तामात्रेण वर्तते ।

यथाह पौष्करे -

श्लो - क्रियतेऽग्निगतश्शक्तिर्मन्त्रशक्तितिरोहिता ।
नैव स्फोटकरी सद्यः प्रज्वलत्यपि पावके ।।
अतिरोहितभावेऽपि मलैनैव स्वशक्तिभिः।
तिरोहितो हि कार्येषु , न चाणुस्सम्प्रवर्तते ।। इति ।
केवलावस्थास्थितात्मलक्षणं यथा -

स्वायम्भुवे -

श्लो - अचेतनो विभुर्नित्यो गुणहीनोऽक्रियोऽप्रभुः ।
व्याघातभोगशक्तिश्च बोध्यश्शोध्यो ऽकलःपशुः ।। इति ।

तस्मादात्मनः कलया केवलावस्थापसरणोऽन्तःकरणेन्द्रियसापेक्षा-विषयदर्शकत्वं युज्यत इत्युक्तं भवति। मलरुद्धस्सदृक्क्रिय इत्युक्तत्वात्। तत्सद्भावप्रमाणहेतुवचनम् -

पौष्करे -

श्लो - आत्मा मलावृतः सर्वज्ञत्वे किञ्चिज्ज्ञतायुतः ।
न किञ्चिज्ज्ञस्तु यस्तोयं मलेनापि न संवृतः ।।
यथाशिवस्तथाचायं मलेनैवसमावृतः ।।" इति ।
तस्य लक्षणं यथा -

कामिके -

श्लो - तथाऽनादिमलस्त्वेकश्चित्रशक्तिश्चितावृतः ।
दृक्क्रियाच्छादकः पुंसो विशुद्धस्य स्वभावतः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पशुत्वव्यवहारस्य निमित्तं त्रिविधाणुषु ।
यत्सम्भवाहम्मात्रेण न च मोक्षव्यवस्थितिः ।।
अपयाते मलेह्यस्मिन् सर्वत्रोदितदृक्क्रियः ।
निरपायं निरातङ्कं शिवत्वमधिगच्छति ।।

मृगेन्द्रे –

श्लो – पर्यायैर्बहुभिर्गीतं विदृष्टं पशुभिस्सदा ।
पशुत्वपशुनीहारमृत्युमूर्छामलाञ्जनैः ।।
अविद्यावृत्तिदृश्यानि पापमूलक्षयादिभिः ।
तदेवं सर्वभूतानामनादिनिबिडं महत् ।।
प्रत्यात्मस्थं कालान्तावधिशक्तिसमूहवत् ।।

पौष्करे –

श्लो – मलोऽपि सप्तधा ज्ञेयो मोहश्चापि मदस्तमः ।
रागोऽन्यश्च विषादश्च तापश्शोषश्च सप्तमः ।।
वैचित्र्यमपि सर्वेषां मलिनानां प्रकीर्तितम् ।

अथेतरव्यावर्तकत्वेनात्मज्ञानक्रियाशक्तिनिरोधकस्याऽणवमल इत्याह ।

तत्रैव पौष्करे –

श्लो – चिच्छक्तिर्नित्यसिद्धायास्सम्भवेत् साधकं कथम् ।
कर्मणापि न च ज्ञानबाधा सम्भवति द्विजाः ।।
साध्यत्वात्कर्मणः पुंसस्साधकत्वेन सम्स्थिते ।
किञ्च भोगैकहेतुः तत्कथं भोगस्य बाधकम् ।।
श्लो – यतो ज्ञानात्मको भोगो न हि तेन तदाऽऽवृतिः ।
तस्मान्न कर्म चिच्छक्तेः बाधकं संव्यवस्थितम् ।।

अथ माया हि कारणात्मनाऽऽत्मज्ञानतिरोधायिकां,(यिनीं) कार्यात्मना प्रकाशिकेति वदन्तं प्रत्युत्तरमाह ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत्रैव पौष्करे –

श्लो – न च मायामलस्तस्माद्यथाकार्यप्रंकाशिका ।
कार्यात्प्रकाशिकं दृष्टौ वह्निदीपौ प्रभावपि ।।
न दीपं कारणं वह्नेः क्वचिदप्यप्रकाशिकः ।
न च मायास्वरूपेण पुंसां कार्यकरी स्थिता ।।
कार्यैरणूपकारित्वात्तदित्थं तन्न चात्मना ।
मायाऽपि बाधिका न स्यादित्युक्तं तन्निरूपणे ।।
मल एवं समुद्दिष्टः पुंसां सर्वज्ञबाधिका ।। इति ।

अथ मायाकार्यकलादियोगात्, सकलावस्थायामात्माकर्तृत्वभोक्तृत्वादिविशिष्टो भवति ।

यदाह –

श्लो – तत्रात्मा पशुराख्यातश्चेतनो जीवसंज्ञितः ।
पुण्यपापात्मनः कर्ता कर्मणो विविधस्य च ।।
तत्फलस्यानुभोक्ता च प्रतिकूलं जिहासति ।
आदित्वाद्यनुकूलार्थं द्वेष्टि हृष्यति रक्षति ।।
अहङ्कारादि देहादौ प्रमाद्यति च शोचति ।
आभ्यसूयति साकूतो नितरामभिमन्यते ।।
तथैव प्रतिसन्धत्ते प्राणिश्वदसि दीक्षिते ।
शृणोति लज्जति स्नाति हसत्युन्मीलयत्यपि।।
उद्वेजयति संस्तौति जीवत्यपि विमुच्यते ।
वक्ति जिघ्रति सन्धत्ते लीयतेऽपि च म्लायते ।।
भावैरनेकैस्सम्भिन्नो निगमानिव सञ्चरेत् ।
अवाच्योऽयमलक्ष्योऽयमवेद्योऽयमनादिमान् ।।
व्यापते व्यापकश्चापि गम्यते गमकोऽपि च ।
असहायस्सहायी च साधकस्साध्यते स्वयम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्वतन्त्रः परतन्त्रोऽपि साधने कर्मणां मुहुः ।
चिन्मात्रश्चेतयत्यन्यान् स्वयं चेतयतेऽथवा ।।
अचिन्त्यमहिमाऽऽश्चर्यगुणराशिरलौकिकैः ।
निर्वाणपदसाम्राज्यो मयैवैषोऽभिषिच्यते ।।
जनयत्यखिलं विश्वं प्रेर्यते जनकोऽपि च ।
बहुधा कथयन्त्येनं बहवः प्रतिपादिकाः ।। इति ।

अत एव आणवमायाकर्मभिर्बद्धसकलसंज्ञक आत्मा अतः पञ्चावस्थक इत्याह ।

अवस्थापञ्चकस्थ इति, पशुरबुद्धाद्यवस्थापञ्चकं लभते, इत्यर्थः ।

तथाह स्वच्छन्दपरमेश्वरे –

श्लो – अबुद्धश्चैव बुद्धश्च बुध्यमानस्तथैव च ।
प्रबुद्धस्सुप्रबुद्धश्च पञ्चापि कथयामि ते ।।
अबुद्धन्तु पुनर्देवि! कथयामि समासतः ।
तव भूतात्मसंहारे कलाक्षित्यन्तगोचरे ।।
मायां सम्यङ् निशायां वै संहृत्य परमेश्वरी ।
निर्व्यापारो भवेत्तस्माद्यावत्तेनोदयः पुनः ।।
सुखदुःखाद्यभावश्च आत्मवर्गस्य कर्मिणः ।
मलनिद्राविमूढात्मा बुद्धश्चैतन्यदृक्क्रियः ।।
स तिष्ठत्यबुधस्तत्र यावन्मा यात्यहर्मुखम् ।
अबुद्धस्तुसमाख्यातो बुद्धं देवि! निबोधय ।।
परिपाकगतः कर्म ईश्वरेच्छाकरोद्यतः ।
प्रकाशा भिन्नयान्यश्चिदनुगृह्णाति भास्करम् ।।
करणान्यनुगृह्णाति तद्वच्चेश्वर आत्मनाम् ।
कलोद्भावितचैतन्यो विद्यादर्शितगोचरः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रागोऽस्य रञ्जकत्वेन विषयानन्दलक्षणः ।
कालो वै कलयत्येनं तृट्यादिप्रळयावधिः ।।
नियतिं निश्चितं नित्यं योजयत्यशुभे शुभे ।
परमाणुसहस्रांशं तदन्यूनं न चाधिकम् ।।
पुम्भावत्वमनुप्राप्य तत्त्वे वै पुरुषाह्वये ।
परं प्रधानमित्युक्तं प्रपञ्चं नैक्सङ्कुलम् ।।
तत्पुरं पूरयेद्यस्मात्तस्माद्वै पुरुषस्स्मृतः ।
ततः श्रीकण्ठभगवान् स्वशक्त्या कर्मतः पशुम् ।।
प्रधानपाशजातेन वेष्टयेदथ विस्मृतः ।
बद्ध(ः)त्रिगुणबध्यो वै कारिका कारकाणि तु ।।
तन्मात्रेन्द्रियबद्धेन दृढभूतैश्च वेष्टितम् ।
बद्धस्संसरति ह्येवं मायाद्यवनिगोचरे ।।
संसारी प्रोच्यते यस्मात् संसारेभ्यः पुनः पुनः ।
शब्दादि विषया यस्य विद्यते विषये तदा ।।
विषयाः प्रधानमित्याहुः नानाभेदैस्समन्वितः ।
नानाकर्मविपाकैश्च भुङ्क्ते तद्भावभावितम् ।।
एवं भुक्तेनैव यस्मात्कस्माद्भोक्ता स उच्यते ।
तस्मिन्नज्ञो, वरारोहे! क्षेत्रे वै कर्षको यथा ।।
मायाभिलाषकालोहि कृष्यते मोहलाङ्गलैः ।
वपेद्विधर्मभावेन मनोवाक्कर्मकान्वितम् ।।
धर्माधर्ममयं बीजं प्रविकीर्णं समन्ततः ।
तस्माद्वाह्यङ्कुरोत्पत्ति सुखदुःखफलोदयम् ।।
वर्तते कामक्रोधेन संसिक्तो रागवारिणा ।
यस्मिन् देशे च काले च वयसा यादृशेन च ।।
उक्तं शुभाऽशुभं कर्म तादृशं लभते फलम् ।
भुक्ते तु विविधाकारं पूर्वकर्म वशाद्बुधः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यस्मादेवं विजानाति तस्मात् क्षेत्रज्ञ उच्यते ।
विषयो बुध्यते यस्मात् बुद्धस्तस्मात्प्रकीर्तितः ।।
तदेवाभीष्टरूपेण यदासौ विषयेषु च ।
बुध्यमानस्तु स यथा ह्यधुना कथयामि ते ।।
यदा जुगुप्सते लोकान् शुभांश्चैवाऽशुभांस्ततः ।
कृत्रिमानिव मन्येत वरं वैराग्यमाश्रितः ।।
मायाद्यवनिपर्यन्तमिन्द्रजालं तु बुध्यतः ।
पुत्रमित्रकळत्रादि सुहृत्स्वजनबान्धवान् ।।
यदाजिनं यदा द्रव्यं शुभेन त्वशुभेन वा ।
तत् क्षोभ्यन्ते तदा सर्वे निराशङ्का निराकुलाः ।।
वयमेकाकिनश्चैव यास्यामो दमसाधनम् ।
तस्माच्च नशुभाह्येते वैरिणोऽनर्थकारिणः ।।
स्वात्मीयमप्ययं देहं नित्यमेव जुगुप्सते ।
शुक्लशोणितसम्भूते विषयाभोगभूषिते ।।
नानाव्याधिसमाकीर्णे जरामृत्युभयाकुले ।
शेकमोहमलाकीर्णे जरामृत्युभयाकुले ।।
नित्यं चिद्विभुमुक्तं तु चिन्त्यमानः पुनः पुनः ।
कथं मुक्तिर्भवेत्तस्मात् संसाराद् दुरतिक्रमात् ।।
एवं प्रबुध्यमानस्तु गुर्वाराधनतत्परः ।
बुध्यमानस्समाख्यातः; प्रबुद्धं कथयामि ते ।।
गुरुप्रसादाद्देवेशि! प्राप्तदीक्षा शिवाध्वरे ।
यदालोकयते देवि शिवज्ञानमहोदयम् ।।
करामलकवत्सर्वम् अध्यात्मातस्वरूपतः ।
शिवाद्यवनिपर्यन्तमीक्षिते ज्ञानचक्षुषा ।।
एवं कृत्वा समन्तस्तु उपाधेः परमं शिवम् ।
उन्मन्यन्तं परारोहे सर्वाङ्गं विभुमव्ययम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एवं प्रबुद्धो देवेशि! तल्लयस्तत्परायणः ।
सर्वारम्भविनिर्मुक्तः प्रबुद्धस्तूच्यते शिवे ।।
प्रबुद्धस्तु समाख्यातः; सुप्रबुद्धस्तु मे शृणु ।
दीक्षया ज्ञानयोगेन चर्या योगेन सुव्रते ।।
यदा प्रोक्तं परं स्थानम् अध्वातीतं निरामयम् ।
विरजं विमलं शान्तं प्रपञ्चातीतगोचरम् ।।
निष्कम्पं कारणातीतं सर्वज्ञं सर्वतोमुखम् ।
तृप्तञ्चनाद्यसम्बन्धं स्वातन्त्र्यं नित्यमेव हि ।।
चक्रसामर्थ्यविभवं सुप्रबुद्धं सनातनम् ।
तस्मिन् मुक्तस्तदात्मानं तद्गुणञ्च समन्वितः ।।
सुप्रबुद्धस्सवै प्रोक्तः इति ।।

अथ मर्त्यलोकवासी, जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतावस्था पञ्चकापन्नोऽसि, भवति। एतदवस्थाः केवलसकलशुद्धभेदोत्र पञ्चका भवन्ति।

तद्यथा स्वयम्भुवे –

श्लो – अथात्मा समलो बद्धः पुनर्मुक्तश्च दीक्षया ।
विज्ञेयस्स त्रिधावस्था केवलस्सकलो मलः ।।
एतदवस्था त्रयमपि सकलप्रळयाकलविज्ञानकलानां साधारणम् ।
तेषां लक्षणमाह –

श्लो – जीवाश्च त्रिविधा ज्ञेयास्सकलाः प्रळयाकलाः ।
विज्ञानकेवलाश्चेति तेषां लक्षणमुच्यते ।।
मायाकर्ममलैर्युक्तस्सकलस्तत्र चोच्यते ।
मलकर्मयुतो विप्राः प्रळयाकल इष्यते ।।
मलेनरुद्धचैतन्यो न मुक्त इति कथ्यते ।
द्विधाऽप्ययं समाख्यातो विप्रा विज्ञानकेवलः ।। इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सकलं च त्रिविध इत्याह ।

श्लो – सांसिद्धिको वैनयिकः प्राकृतश्च भवत्यणुः ।
विशिष्टधर्मसंस्कारसमुद्दीपितचेतसाम् ।।
गुणस्सांसिद्धिको भाति देहाभावेऽपि पूर्ववत् ।
लोकधीगुरुशास्त्रेभ्यो भाति वैनयिको गुणः ।।
सम्मार्जितो वैनयिको मनोवागनुचेष्टया ।
प्राकृतो देहसंयोगे व्यक्तस्वप्नादिबोधवत् ।।

इति त्रिविधपञ्चावस्थासु केवलसकलभेदावस्थादशकं, पञ्चभूत-परिणामदेहिनामेव तत् स्वरूपं यथा –

अचिन्त्ये –

श्लो – मुखे जाग्रमि(दि)ति ज्ञेयं स्वम्नं तु हृदयात्मकम् ।
हृदयान्तं समारभ्य नाभ्यन्तं तु सुषुप्तिकम् ।।
तस्मादधस्तुरीयं तु तुर्यातीतन्तु लिङ्गकम् ।
जाग्रादिस्थानमेवंहि प्रवर्तकमिहोच्यते ।।
श्रोत्रत्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चकम् ।
शब्दस्पर्शरसारूपो गन्धश्चैव तु पञ्चकम् ।।
वचनाऽदानगमनविसर्गानन्दपञ्चकम् ।
प्राणाऽपानस्तथा व्यानउदानश्च समानकः ।।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ।
मनोबुद्धिरहङ्कारचित्तं क्षेत्रज्ञ एव च ।।
पञ्चत्रिंशद्विवर्तन्ते जाग्रेतानि विनिर्दिशेत् ।
शब्दादिर्वचनादिश्च प्राणादीनि मनोदिकम् ।।
एते चरन्ति वै स्वप्ने वायुरूपेण जाग्रतः ।
क्षेत्रज्ञश्चित्तप्राणैश्च सुषुप्तिश्चित्तवर्जितः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तुर्ये तुर्यातीतके स्यात् क्षेत्रज्ञस्सर्ववर्जितः ।

एते केवलभेदाः, एवं क्रमेण, सम्प्रति जाग्रत्पर्यन्तमारोहणविधान-मवस्थापञ्चकम् । शुद्धावस्थापञ्चकंतु नवमसूत्रेवक्ष्यामः ।

एवमवस्थापञ्चकानुस्यूतो जीवात्मा देहे वर्तमान इत्यर्थः, ननु तत्त्वानामा-कल्पस्थायित्वादात्मनां, नित्यव्यापकचिद्रूपित्वात्कथम् अवस्थापञ्चकत्वमुपपद्यत इत्याशङ्क्योत्तरवचनं यथा –

अचिन्त्ये –

श्लो – अयसोऽग्नेऽर्यथा योगे वियोगोऽग्नेर्यथाऽयसा ।
तत्त्वानामात्मनश्चैव शक्त्या कर्मवशा भवेत् ।। इति ।
अथात्मलक्षणपरामर्शादनन्तरं निश्चितवचनम्

मृगेन्द्रे –

श्लो – नाव्यापको न क्षणिको नैको नापि जडात्मकः ।
नाकर्ता भिन्नविद्योगी पाशान्ते शिवताश्रुतिः ।। इति ।

इति श्रीनिगमागमपारावारगतसदाशिवशिवाचार्यविरचितायां सिद्धन्तवृत्तौ पशुपशुत्वप्रमाणलक्षणं निरूपणं नाम द्वितीयः पटलः ।।

सव्याख्याने शिवज्ञानबोधे
पञ्चमसूत्रं प्रारभ्यते

अव :- अथ परमेश्वर स्वसमवेतज्ञानक्रियाशक्तिद्वारा, जीवात्मना तन्वादिकमनुप्रविश्य भोगदायकत्वेन, पालनतिरोधाने करोतीति, पञ्चमसूत्रेणाह ।

५ – सूत्रम्

सू।। विदन्त्यक्षाणि पुंसार्थान्नस्स्वयं सोऽपि शम्भुना ।
तद्विकारी शिवश्चेन्न; कान्तोऽयोवत्सतन्नयेत् ।। इति ।।

पद :- अक्षाणि, अर्थान्, स्वयं,न विदन्ति, किन्तु, पुंसां, तद्वत्, सोऽपि, शम्भुना, तच्छिवे, विकारीचेत्,कान्तो, अयोवत्, स तं, नयेत्, इति योजना ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

व्याख्या :– अक्षाणि, अर्थान्, स्वयं, न विदन्ति, किन्तु, पुंसेति, श्रोत्रादीन्द्रियाणि, शब्दादिविषयान्, स्वयं, न जानन्ति, किन्वात्मना प्रेरकेण जानन्ति, तद्वत्, सोऽपि, शम्भुना इति ।।

यथा आत्मनः प्रेरकेणाक्षाणि अर्थान् वेत्ति, तथा पुमानपि शिव प्रेरेकेणाऽर्थान् वेत्ति; न स्वयम् ।

अयमभिप्रायः शिवसमवेतचिच्छक्तिप्रकाशेनेत्यर्थः ।

यथा पौष्करे –

श्लो – अज्ञो जन्तुरनीशोऽयमात्मा यत्तत्त्वतद्विभुः ।
सोऽपि सापेक्ष एव स्यात् स्वप्रवृत्तौ घटादिवत् ।।
इष्यते स कथं कर्ता कर्ता तस्मान्महेश्वरः ।

पराख्ये –

श्लो – पशुत्वारूढचिच्छक्तेस्स्वातन्त्र्यं न पशोरतः ।
कर्म चिद्हितं तस्मात् योजकं तदपेक्षते ।।
योजकस्स महेशानः स्वेच्छया बलवानतः ।। इति ।
अथ योजनप्रकारो यथा–

पौष्करे –

श्लो – मलान् सर्वात्मना हित्वा चैतन्यप्रसरात्मनः ।
कलाभिव्यज्यते तत्तु तस्यैव हि तिरस्कृतम् ।।
किन्तु कर्मानुसारेण कलाप्रत्येकदेशतः ।
ततश्चायं कलाबद्धः पुंसां प्राथमिकस्थितः ।।
यतो विना यथा तेषां रूपं तं न तु सिध्यति ।
ततस्तच्छून्यकल्पं स्याच्छैतन्यप्रसरं विना ।।
ग्राहकत्वेन तत्सिद्धौ न च तद्ग्रहणां विना ।
ग्रहणाभावतस्तस्य ग्राहकश्शून्यवत् स्थितः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कलयाकर्तभूतस्य बुद्धिलक्षणकर्मणः ।
आलोकयद्यत्करणं सा विद्या शिवशासने ।।
बुद्धिर्हि कर्मग्राह्यत्वादात्मनो घटकुड्यवत् ।
ग्राह्यं करणसापेक्षं दृष्टं रूपादिकं यथा ।।
ततस्तु चक्षुराद्यैश्च क्रमेणार्थे विनिश्चिते ।
बुध्यन्ते निश्चितार्थेस्तान् पुमान् संवेत्ति विद्यया ।।
प्रवृत्तस्य प्रसक्तार्थमपि रागः प्रवर्तते ।
भोगाभावादशक्तस्य भुञ्जानस्य मलीमसान् ।।
भोगानतृप्तेस्तस्यातः कर्तुरेवोपकारिता ।
कालः प्रवर्तमेवाणुं कलयत्यात्मवृत्तिभिः ।।
नियतिश्च तथा कर्मफलैर्नियमयत्यणुम् ।
तस्मिन्नियतिकालौ च स्थितौ कर्त्रृपकारकौ ।।
पञ्चकञ्चुकसंयुक्तां प्रकृतिं भोक्तुमुद्यतः ।
अविद्यादिसमायुक्तः पुरुषः परिकीर्तितः ।। इति ।

अथ भोगसमुच्चयवचनानि यथा –

पराख्ये –

श्लो – कलोद्वलितचैतन्यो विद्यादर्शितगोचरः ।
रागेण रञ्जितश्चापि बुध्यादिकरणैर्युतः
मायाद्यवनिपर्यन्ते तत्त्वभूतात्मवर्त्मनि ।
भुङ्क्ते तत्र स्थितान् भोगान् भोगैकरसिकः पुमान् ।। इति ।

एवं पालनं स्वसम्वेदनानुसंवेद्यविधानं तिरोधानम् । अथाऽनेकजीवानां बहुधा प्रेरकत्वेन शिवस्य विकारित्वमाशङ्क्य परिहरति ।

श्लो – तद्विकारी शिवश्चेन्न कान्तोऽयोवत् स तन्नयेत् ।। इति ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदिति, तेन पालनतिरोधानत्व, हेतुना शिवो विकारवान् स्यादिति चेत् विकारवन्न भवति, किन्तु यथा कान्तो निर्विकारी सन्, अयो विकारयति, तथा शिवस्त्वविकारी सन्, वृत्तिज्ञा स्वरूपजीवात्मनां, विकारयतीत्यर्थः ।।

इति श्रीनिगमागमपारवारगतसदाशिवशिवाचार्यविरचितायां सिद्धान्तसूत्रवृत्तौ पशुपालनप्रतिपादनं नाम तृतीयः पटलः ।।

सव्याख्याने शिवज्ञानबोधे
षष्ठसप्तमसूत्रे प्रारभ्येते

अव :- एवं दर्शयितुं शिवलक्षणं षष्टसप्तमसूत्राभ्यामाह -

६ - सूत्रम्

सू।। अदृश्यं चेदसद्भावो दृश्यश्चेज्जडिमा भवेत् ।
शम्भोस्तद्व्यतिरेकेण ज्ञेयं रूपं विदुर्बुधाः ।। इति ।

७ - सूत्रम्

सू ।। नाऽचित् चित्सन्निधौ किन्तु न वित्तस्ते उभे मिथः।
प्रपश्यशिवयोर्वेत्ता यस्स आत्मा तयोः पृथक् ।। इति ।

पद :- शम्भोः, रूपमदृश्यं चेत्, असद्भावः, दृश्यश्चेत्, जडिमा, भवेत्, तद्व्यतिरेकेण, ज्ञेयं, बुधाः, विदुः इति योजना ।। ६ ।।

चित्सन्निधौ, अचित् नते, उभे मिथः, नवित्तः, किन्तु, प्रपश्यशिवयोः, वेत्ता, यः, सः, तयोः, पृथक्, आत्मेति योजना ।। ८ ।।

व्याख्या - शम्भोः रूपं, अदृश्यश्चेत्, असद्भाव इति, शं सुखं भवत्यस्मादिति व्युत्पत्या शम्भुः, तस्य रूपं स्थूलसूक्ष्मरूपव्यतिरिक्तश्चिदेक रूपं यथाह -

देवीकालोत्तरे -

श्लो - न स्थूलः सूक्ष्मो न च शून्यरूपो ज्ञानैकरूपो जगदेकबन्धुः ।। इति ।

एवं भूत शिवस्य रूपं केन वर्त्मनाऽप्यदृश्यश्चेत्, गगनारविन्दवत् शून्यत्वेनाऽसद्भाव स्यात्, तस्मादात्मनश्शिवात् प्रयोजनमेव नास्ति, दृश्यं चेज्जडिमा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भवेदिति, स्थूलरूपत्वेन चक्षुरिन्द्रियगोचरं, सूक्ष्मरूपत्वेन परमाणुवद्योगिप्रत्यक्षभावे चेत्, घटपटादिवत् जडत्वमनित्यत्वादसत्वं च स्यात्, एवं दृश्यत्वाऽदृश्यत्वा सम्भवेन कीदृग्भूतं शिवस्वरूपमितिचेत्, तद्व्यतिरेकेणेति, इन्द्रियगोचरत्वाऽ-त्यन्ताऽगोचरत्व विरहेन ज्ञेयम्, इति अनन्यानुभवैकवेद्यम् ।।

तथा च वीरतन्त्रे –

श्लो – आद्यन्तशून्यममलं परिपूर्णमेकं
सूक्ष्मं परात्परमनामयमप्रमेयम् ।
भावैकगम्यमजडं शिवतत्त्वमाहुः ।। इति ।

निश्वासे देवीसंवादे –

श्लो – सकळे दृश्यमाने तु भावे युक्तो हि देहिनः ।
निष्कळे दर्शनं नास्ति, अदृश्ये भावना कुतः ।।

ईश्वरः :–

सुशाश्वतं सुनिर्वाणम् आदिकारणवर्जितम् ।
निर्मुक्तत्वान्न सङ्कल्पं सकळाऽकलवर्जितम् ।।
अभावं भावभावेन भावयेद्भाववर्जितम् ।
बुध्यहङ्कारनिर्मुक्तं योगयोगाविवर्जितम् ।।
तेन देवि! समाख्यातो सत्त्वादिकरणोर्जितम् ।
प्रधानगुणनिर्मुक्तं हेतुकालविवर्जितम् ।।
देहादेहविनिर्मुक्तं योगायोगविवर्जितम् ।
तेन देवि! समाख्यातो महाभावः परश्शिवः ।। इति ।

एवमनन्यानुभव एकवेद्यमिति बुधाः विदुः । जीवन्मुक्ता महात्मानो वदन्तीत्यर्थः । एवं विना शिवेन जीवेन वा पृथक्तया, यद्दृष्टं तं नष्टं तस्मात्तस्या-सत्वमचित्वञ्च भवेदित्युक्तम् ।

ननु एवं चेत् –जीवात्मा शिवस्यापि दृश्ये वा अदृश्ये वा(?)अदृश्यश्चेत्, शिवस्य सर्वज्ञत्वसर्वव्यापकत्वादिकं न स्यात् । दृश्यश्चेत् जीवात्मनोऽपि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जडत्वमसत्वञ्च स्यात्, इति चेत् उच्यते -शिवो जीवं स्वान्यत्वेन पश्यति चेत् तथात्वं क्वापि तथा न पश्यति, किन्तु स्वस्वरूपानन्यत्वेन पश्यति, तस्मान्न विरोधः। जीवशिवयोरन्योनम् अविनाभावेन न दृश्यत्वम्, प्रपञ्चशिवयोः कथमित्या-शङ्कायामुत्तरमाह -नाचित् चित्सन्निधौ इत्यादिना-चित्सन्निधौ अचिन्नेति, सदसत् चिदचिदिति पर्यायः, सच्चिद्रूपशिवसन्निधौ असच्चिद्रूपप्रपञ्चो न स्फुरति तस्मात्ते उभे मिथे न वित्त इति, शिवसन्निधौ प्रपञ्चस्यास्फुरितत्वात् प्रपञ्चस्य जडत्वाच्च प्रपञ्च शिवावन्योन्यं न जानीतः। तथात्वे सृष्ट्यादिकृत्यं शिवस्यासङ्गतश्च इति चेत् उच्यते, ऐन्द्रजालिको यथा स्वशक्त्या जनेभ्यः समुद्रनगरादिनानाकारप्रदर्शिता च स्वयं तथा न पश्यति तद्वत् स्वपरिग्रहमायाशक्त्या जीवेभ्यस्तनुकरणभुवनादि-नानाकारेण प्रपञ्चप्रदर्शकोऽपि, शिवस्य सन्निधौ प्रपञ्चस्य तथा न स्फुरितत्वात् स्वयं तथा न पश्यति । तस्मात् सृष्ट्यादिकृत्यानि प्रपञ्चम् अपश्यतोऽपि शिवस्य सङ्घटन्ते। तर्हि प्रपञ्चदृष्ट्या कोवेत्याशङ्कायाम् अन्य एवेत्याह, किन्त्विति प्रपञ्चशिवयोर्वेत्ता यस्स तयोः प्रृथक् ।

आत्मेति, सकलावस्थायां वृत्तिज्ञानेन पृथक्तया प्रपञ्चं दृष्ट्वा, निर्मलावस्थायां स्वरूपज्ञानेनान्यतया शिवानुभविता च, तदुभयविलक्षणलक्षितो जीवात्मैवेत्यर्थः। उभयविलक्षणत्वं नाम प्रतिहतज्ञानस्वरूपस्य शिवस्य जडरूपप्रपञ्चस्य विलक्षणा एव, मलशक्तिप्रतिहतज्ञानस्वरूपत्वं अनेन वृत्तिज्ञानरहितस्य शिवस्य मायाशक्तिविलासकल्पितप्रपञ्चदर्शनं न सम्भवति, तस्मात् मायाशक्तिविलास-कल्पितप्रपञ्चदर्शनं न सम्भवति, तस्मात् सत्यं सत्यवस्तुदर्शकत्वे जीवात्मन एवेति चोक्तं भवति ।।

इति श्रीनिगमागमपारावारगतसदाशिवशिवाचार्यविरचितायां सिद्धान्तसूत्रवृत्तौ सदऽसद्विवेकनिरूपणं नाम चतुर्थः पटलः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सव्याख्याने शिवज्ञानबोधे
अष्टमनवमसूत्रे प्रारभ्येते

अव :- अथ जीवात्मनामीश्वरशक्तिप्रेरितकलया प्रपञ्चानुभवित्यप्रकारं पञ्चमसूत्रे श्रुतः । इदानीं शिवानुभवित्वं केन मार्गेण सिध्यतीत्याशङ्कायामुत्तरम् अष्टमनवमसूत्राभ्यामाह ।।

८ - सूत्रम्

सू ।। स्थित्वा सहेन्द्रियाव्याधैः स्वां न वेत्सीति बोधितः ।
मुक्त्यैतान् गुरुणाऽनन्यो । धन्यः प्राप्नोति तत्पदम् ।। इति ।

९ - सूत्रम्

सू ।। चिद्दृशात्मनि दृष्ट्वेशं त्यक्त्वा वृत्तिमरीचिकाम् ।
लब्ध्वा शिवपदच्छायाम् ध्यायेत्पञ्चाक्षरीं सुधीः ।। इति ।।

पद :- धन्यः, इन्द्रियव्याधैः, सह, स्थित्वा, नवेत्सीति, गुरुणा, बोधितः, एतान्मुक्त्वा , तत्पदम्, अनन्यः, प्रप्नोतीति योजना ।। ८ ।।

सुधीः, वृत्तिमरीचिकां , त्यक्त्वा , आत्मनि ,चिद्दृशा, ईशं ,दृष्ट्वा , शिवपदच्छायाम् ,लब्ध्वा ,पञ्चाक्षरीं ,ध्यायेदिति योजना ।। ९ ।।

व्याख्या :- धन्य इति - प्राकृतिक्रियाचर्या योगानुष्ठानेन कर्मनाशो मलपरिपाके च सति शक्तिपातवशान्निर्वाणदीक्षावान् । "सुकृती पुण्यवान् धन्यः" इत्यमरः ।

देवीकालोत्तरे -

श्लो - ज्ञानोत्पत्तिनिमित्तं हि क्रियाचर्ये प्रवर्तते

इन्द्रियव्याधैस्सह स्थित्वेति, इन्द्रियपदं पाशोपलक्षणं तत्सरूपकत्वेन निर्दिष्टं, व्याधपदं विधिनिषेधान्तराप्रवर्तकद्योतकं, ज्ञानधनापहारकं वा, पाशाश्च मायाप्रवृत्त्यात्मकतनुकरणभुवनभोगाः, तद्धेतुभूतपुण्यपापात्मकं कर्म मलीमस-भोजयितृमोहादि गुणाणवः मलश्च, एते पाशाः एतदुदासेनैव मलमायाद्यसंस्पृष्टो भवति । स्वानुभूतिमान् इति दशमसूत्रेण पठितं, तैः पाशैस्सह स्थित्वा, त्वां न

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वेत्सीति गुरुणा बोधित इति, तवस्वरूपमखण्डाकारसच्चिदा-नन्दाद्वयपरि-पूर्णमदनन्यः जानासीति, शिवाकारगुरूणा समुपदिष्टं, एतान् मुक्त्वेति, विषयार्थं चित्तादौ प्रभूतज्ञानवृत्तिमतीन्द्रियव्याधान् परित्यज्य तत्पदमनन्यः प्राप्नोतीति। आचार्यमूर्तिभृच्छिवस्वरूपमभिन्नतया प्राप्नोति।

तदुक्तं देवीकालोत्तरे-

श्लो - चित्ते चलति संसारे निश्चले मोक्ष एव तु ।
तस्माच्चित्तं स्थिरं कुर्यात् प्रज्ञया परया बुधः ।। इति ।

अथवा "नामरूपक्रियाविरहितत्वात्तदिति " प्रयुक्तं पदं वस्तु, "पदं व्यवसितत्राणस्थानलक्ष्म्याङ्घिवस्तुष्वित्यमरः" तच्च तत्पदञ्च तत्पदमनेन नामतिरोहितं परवस्तु प्राप्य प्रापकराहित्येन प्राप्नोतीत्यर्थः । गुरुणेत्यनेन-स्वापे शक्तित्रया(यी)मात्मवर्गत्रयेषु, यान् तीव्रतरशक्तिनिपातवतोऽनुगृह्णाति, ते सद्य एव शिवा भवेयुः, सर्वार्थसंहारौ सृष्ट्यादौ च स्वयं यान् तीव्रतरशक्तिपातवतोऽनु-गृह्णाति तेऽपि पतिस्वरूपा भवन्ति । अथवा सृष्ट्यादौ स्वयं यान् तीव्रतरशक्ति-निपातवतोऽनुगृह्णाति, ते रुद्रमन्त्रेशानपदभाजो भवन्ति, इत्येतद्द्वयवृत्तिर्भवति ततश्च स्थितौ, गुरुमूर्तिमदिष्टाय सकलेषु शक्तिनिपातवतो ज्ञानोत्कटत्वेनानुगृह्णाति। अतिलोभितं भवति उक्तार्थे सम्मतिवचनानि ।।

श्लो - या विमोहयति स्वापे शिवास्सद्यो भवन्ति ते।
संसृतौ वा समुद्भूता वाणवःपतयेऽथवा ।।
रुद्रमन्त्रपतीशानपदभाजो भवन्ति ते।
संस्थितानुगृह्णीत गुरुमास्थाय चिद्वते ।। इति ।।

एवं त्रिविधपशूनां मध्ये विज्ञानकलप्रळयकलानां, तीव्रतीव्रताशक्तिनि-पातवशात् आत्मसहायशिवो ज्ञानक्रियायोगपरमानन्दस्याभिव्यक्तिं करोति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तथाह –

श्लो – शक्तिप्रपञ्चतन्नाम दीक्षायां प्राप्तिरात्मनः ।
मन्दमन्दतरं चेति तीव्रतीव्रतर स्तथा ।।

चतुर्थेति मृगेन्द्रे –

श्लो – तमश्शक्त्याधिकारस्य निवृत्तौ तत्परिच्युतौ ।
व्यनक्ति दृक्क्रियाऽनन्त्यं जगद्बन्धुरणोश्शिवः ।।" इति ।
अथ शक्तिनिपातक्रमो यथा –

पौष्करे –

श्लो – सकलानाञ्च सर्वत्र कर्मसाम्यं न कारणम् ।
यतःकर्माणि सत्वेऽपि ततस्त्वेकं तु कर्मणाम् ।।
अपाके परमेशोऽपि विरुद्धान्यप्रदा स्थिता ।
कर्मणोऽन्यस्य साम्येऽपि पक्के तदितरेऽपि च ।।
तं व्रत्यै वैश्वरीशक्तिरुपसर्पति तच्छिवे ।
अनुग्रहे ततो नेष्टं तत्साम्यं मुनिपुङ्गवाः ।।
कर्मनाशे मलस्यापि विपाके सहकारिणः ।
पतत्युन्मीलिनी शक्तिः स्वतोऽनुग्रहकारिणी ।।
तस्यां पतितमात्रायां महस्याथ नियामिका ।
शक्तिर्निवर्तते तस्यां निवृत्तायां महात्मनः ।।
वैराग्यं जायते श्रीघ्रं संसारादुःखसागरात् ।
दिदृक्षा जायते शम्भोः पदपङ्कजयोरपि ।।
कदा द्रक्ष्यामि देवेशं मोक्षेऽहं बद्धतः कदा ।
को वा दर्शयिता शम्भोः इति सञ्जायते मतिः ।।

मृगेन्द्रे –

श्लो – येषां शरीरिणां शक्तिं पतत्यपि निवृत्तये ।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अन्यत्र –

देहापातस्तथाकम्पः परमानन्दहर्षणे ।
देहरोमाञ्च इत्येतच्छक्तिपातस्य लक्षणम् ।।

पौष्करे –

श्लो – एवं संसारतो भीतमनुगृह्णाति चेश्वरः ।
तद्योग्यतानुसारेण करुणागर्भया दृशा ।
अनादिसाधिकारेण यथापि परमेश्वरः ।।
अनुग्रहस्य विनये तदानुग्राहकस्य च ।
कारुण्यत्वेन यस्तस्मात् तयोर्योगः सुदुर्लभः ।। इति ।

ननु शक्तिनिपातस्य हेतुकर्मवशे मलपरिपाक एव प्रतिपादितः, शक्तिनिपातचातुर्विध्यंकेन हेतुनेति चेत्, उच्यते मलपरिपाकतारतम्येन शक्तिनिपातचातुर्विध्यं तदनुगुण्येन समकाले एव ज्ञानोदयाऽज्ञाननिवृत्तिः तदुक्तम् –

पराख्ये –

श्लो – स्वल्पोऽभिव्यज्यते स्वल्पं महान् महति तत्स्थितम् ।
यादृक् तादृक् भवेत्तस्य प्रदीपस्तिमिरो यथा ।।

स्वायम्भुवे च –

श्लो – शिवेच्छया परानन्दा शैवी शैवार्थदायिका ।
सा शक्तिरापनन्याद्या पुंसो जन्मन्यपश्चिमे ।।
तन्निपातात् क्षरत्यस्य मलससारकारणम् ।
क्षणे तस्मिन् यियासा स्यात् परं निश्रेयसं प्रति(ः) ।।
स देशिकमनुप्राप्य दीक्षाविच्छिन्नबन्धवः ।
प्रयाति शिवसायुज्यं निर्मलो निरुपप्लवः ।।
अनेन क्रमयोगेन परां केवलतां गतः ।
अनाद्यशुद्धिशून्यत्वात् प्राप्नोति न भवान्तरम् ।। इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथ प्रसङ्गात् पापात्मनामनुग्रहाय, साक्षात् शिवाधिष्ठिताऽचार्यलक्षणम्

आह –

सुप्रभेदे –

श्लो – ब्राह्मणः क्षत्रियो वैश्याः शूद्राश्शुद्धकुलोद्भवाः ।
आचार्यास्तेच विज्ञायानान्येषां तु कदाचन ।।

द्विशतिकालोत्तरे च –

श्लो – ब्राह्मणः क्षत्रियः वैश्याश्शूद्राश्शुद्धास्तु साधकाः ।
स्ववर्णादानानुपूर्वेण आचार्यास्तु षडानन ।
क्रियापादे तु निपुणः चर्यापादानुवर्तकः ।
योगपादकृताभ्यासः ज्ञानपादानुरञ्जकः ।
एतद्गुणसमायुक्तान् गृह्णीयात्तान् विचक्षणः ।।

वायव्ये च –

श्लो – शिवशास्त्रसमायुक्ताः पशुशास्त्रपराङ्मुखाः
ब्राह्मणादिचतुर्वर्णा आचार्यास्तु प्रकीर्तिताः ।।

अचिन्त्यविश्वसादाख्ये –

आचार्यपदनिर्वचनम् –

श्लो – ज्ञानयोगक्रियाचर्यास्सम्यगाचरयेद् व्रतम्।
तस्मादाचार्य इत्युक्तः सर्वभूतहिताय वै ।।
आचार्यौ द्वौ समाख्यातौ विरक्तः प्रथमो भवेत् ।
भौतिकस्तु द्वितीयस्यात्प्रथमे तु विशेषकौ ।।
आजन्मब्रह्मचारी च यती च तदनन्तरम् ।।
एतद्वयं तु प्रथमे; द्वितीये तु द्वयं भवेत् ।।

सूतसम्हितायाम् –

श्लो – ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
अतिवर्णाश्रमी चेति क्रमाच्छ्रेष्ठो विचक्षणः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अतिवर्णाश्रमी प्रोक्तो गुरुस्सर्वाधिकारिणाम्।
न कस्यापि भवेच्छिष्यो यथाहं पुरुषोत्तम ।।
अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते।
तत्समोनाधिकश्चास्मिन् लोकेऽस्त्यैव न संशयः ।।
योऽतीत्य स्वाश्रमान् वर्णान् आत्मन्येव स्थितः पुमान्।
सोऽतिवर्णाश्रमी प्रोक्तः सर्ववेदार्थदर्शिभिः ।।
लक्षाध्यायी गुरुश्रेष्ठो भुक्तिमुक्तिफलप्रदः।
भवेत्तदुपदेशाद्वा संहिता पारगो गुरुः ।।

अचिन्त्यविश्वसादाख्ये –

श्लो – एतेषां देशिकानाञ्च लक्षणं शृणु सुव्रत।
अहिंसस्सत्यशौचादिविश्वजीवदयापरः ।।
क्षमावान् शान्तचित्तश्च निग्रहाऽनुग्रहे क्षमः।
समाचारयुतो दक्षो जपध्यानपरायणः ।।
ज्ञानदीक्षासमायुक्तो गुरुभक्तिविचारतः।
ज्ञानयोगक्रियाचर्याश्चतुष्पादान्तशास्त्रवत् ।।
डम्बाचारविनिर्मुक्तः क्षुद्रकर्मविवर्जितः।
शिष्याणां गुणदोषेषु विज्ञानी च जितेन्द्रियः ।।
रागद्वेषविनिर्मुक्तः कृपया च समन्वितः।
समयानाञ्च सर्वेषां ज्ञानसारपरिग्रही ।।
शिवानुभूतिसंयुक्तः संशयच्छिदऽसंशयः।
क्षयकुष्ठादिरहितः वीतरागश्च सुन्दरः ।।
निर्ममो निरहङ्कारो निश्शङ्को निर्विकल्पकः।
तमोविहीनः शास्त्रज्ञः परमार्थविचिन्तकः ।।
एवं लक्षणसंयुक्तोऽप्याचार्यवर उच्यते।
भौतिको ऽपि विशेषेण धर्मपत्नी समन्वितः ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पूर्वोक्तलक्षणोपेतो ह्याचार्यवर उच्यते ।।
सन्यासाश्रम अत्यन्त उत्तमं दीक्षितं विदुः ।। इति ।
अथ शिष्यलक्षणमाह –

पराख्ये –

श्लो – चतुर्वर्णे तु सञ्जातश्शास्त्रज्ञाननिरूपकः ।
भक्तिज्ञानविरागेण बुद्धिमान् नीतिमान् सदा ।।
पुरुषार्थप्रकर्ता च सदा निर्णयबुद्धिमान् ।
शुश्रूषायाश्च कुशलो गुरकार्ये प्रयत्नवान् ।।
सन्ततं गुरुशुश्रूषा वागुल्लङ्घनभीरुकः ।
एतल्लक्षणसम्पन्नस्स शिष्यः परिकीर्तितः ।।
अमद्यपास्तु ये शूद्रा शैचाचारक्रियादराः ।
शिवभक्ताश्च एतेषां दीक्षा कार्याऽन्यथा न हि ।।
सर्वेषामेव शिष्याणामधिकं शतगुणं शृणु ।
भक्तिविश्वासमद्रोहो गुर्वाज्ञापालनस्थितिः ।।
श्रद्धाः शान्ति क्षमा सत्यं तथा शौचं तपः शृतम् ।
कृतज्ञता द्वादशकं यस्य शिष्यस्य विद्यते ।।
शिष्याणाश्च प्रधानश्च नान्ये ते न प्रधानकाः ।।" इति ।

एवम्भूतशिष्यं वत्सरं परीक्ष्य, तस्य दीक्षाभेदप्रकारमाह–तस्य दीक्षा कर्तव्या ।

तथा च आगमे –

श्लो – गुरुश्च स्वाश्रितान् शिष्यान् वत्सरैकं परीक्षयेत् ।
चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा ।।
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकदा ।। इति ।
हौत्री च ज्ञानक्रियाभेदेन द्विविधेत्याह ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

श्लो – ज्ञानदीक्षा भवेदेका क्रियावत्यपरा स्मृता।
विनेज्यानलकर्माणि मनोव्यापारमात्रतः ।।
दीक्षा ज्ञानवती प्रोक्ता सम्यक्तत्त्वावबोधजा।
इज्यानलवती या तु क्रियाकौशलसम्भवा ।।
क्रियावत्यथवानेका निर्बीजा च सुबीजका ।। इति ।

एवं ज्ञानदीक्षया वा क्रियादीक्षया वा, आचार्यः शक्तिनिपातानुगुणेन क्रमेण निवृत्यादिपञ्चकलासु शोधित कलामस्तकस्थैश्च स्त्वेस्सहमुक्तिं प्राप्तुं तत्तत्पदे तत्साम्यतया योजयति ।।

तीव्रतरशक्तिनिपान्तं तु सद्योनिर्वाणदीक्षया परमात्मनैक्यं असादयति।
तच्च तच्छक्तिभेदो यथा –

मृगेन्द्रे –

श्लो – निवृतिक्रियया सा स्या-----निवृत्तका।
निवृत्तिरिति तत्थानं तत्रेशोऽपि निवृत्तिमान्।।
निवृत्तस्य गतिर्भूयो यह्यवृध्यवलक्षणा।
निक्षिप्यते प्रितिष्ठाना स्थानं तद्यश्च तत्पतिः ।।
त्यक्त्वा त्वगम्यविषयं यदा ज्ञानं तद्यश्च तत्पतिः।
त्यक्त्वा त्वगम्यविषयं यथा ज्ञानं ददात्यणोः।
सा विद्यास्थानमप्यस्य विद्येशश्च तदीश्वरः।।
सर्वदुःखप्रशमनं यथास्य कुरुते हरः।
सा शक्तिस्तत्पदं चेति तत्कुर्वन् सोऽपि शान्तिमान्।।

अचिन्त्य विश्वसादाख्ये –

श्लो – जले जलं यदा क्षिप्तं क्षीरे क्षीरमिवार्पितम्।
तथैव शिवतां याति दीक्षामात्रेण मन्त्रवित् ।। इति ।

ननु, वेदान्तज्ञानेनैव मोक्षः प्रसिद्धः दीक्षा सा सिद्धान्त ज्ञानाभ्यां मोक्ष इति कथमुच्यते इत्याशङ्क्योत्तरवचनानि –

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कामिके –

श्लो – मले निवर्तते ज्ञानाद्दीक्षया वा मुनीश्वराः ।
परमात्मेति विज्ञेयस्ततः कैवल्यमश्नुते ।।
सिद्धन्तेनैव वेदान्ते विशेषः कोऽपि विद्यते ।
परमात्मपरिज्ञानावुभयोरपि निवृत्तिः ।।
कथ्यते वस्तुसम्भेद तुल्यमेव निरूप्यते ।
भिद्यते हृदयग्रन्थिश्छिद्यंते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परापरे ।। इति ।

अस्मिन् सूत्रे दीक्षानन्तरं मायोपदेशवाक्यस्य पठितत्वात् पूर्वाङ्गभूततया प्रतिपादनीयत्वेऽपि तस्या विस्तारेणास्मत्परमगुरुचरणेश्वर–शिवाचार्येण, "सन्यास दीपिकायां" प्रतिपादित्वाकिञ्चिदेवाऽस्माभिः अत्र सूचितम् ।

अथैतान् मुक्त्वा तत्पदमनन्यप्राप्नोतीत्यर्थं नवमसूत्रेण विवृणोति चिदृशेत्यादिना सुधीरिति, आचार्यानुग्रहेण शिवज्ञानाभिव्यक्तिमान् वृत्तिमरीचिकां त्यक्त्वेति, विषयग्राहक्वृत्तिज्ञानभूतमरीचिकां संयम्य, "मृगतृष्णा मरीचिकेत्यमरः" विषयग्राहकवृत्तिज्ञानपरमेव प्रपञ्चराहित्यकैः मुक्तिकन्यायसिद्धम् ।

तथा देवीकालोत्तरे –

श्लो – निराश्रयं सदाचित्तं सर्वालम्बनवर्जितम् ।
मनोवस्था विनिर्मुक्तं विज्ञेयं मुक्तिलक्षणम् ।।
विषये लोलुपं चित्तं मर्कटादपि चञ्चलम् ।
सर्वशून्यपदे स्थित्वा ततो निर्वाणमेष्यति ।।

चित्तं ज्ञानमिति पर्यायः । "चित्तं तु चेतो हृदयमित्यमरः" । आत्मनीति, जीवात्मस्वरूपे तल्लक्षणं यथा –

देवीकालोत्तरे –

श्लो – सर्वतत्त्वादि सम्भिन्नो देहाद्भिन्नस्तथैव च ।
अहमस्मादि सम्भिन्नं चैतन्यं सर्वतोमुखम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चिद्दृशा-ईशदृष्टेति, ज्ञानेन नित्यविभूतिप्रदायकत्वादीशाभिधानकं अवलोक्य, तत् ज्ञानमत्यक्त्वेति शेषः।

तथा आगमः -

श्लो - उल्काहस्तो यथा कश्चिद्द्रव्यमालोक्य तांत्यजेत्।
ज्ञानेन ज्ञेयमालोक्य पश्चात् ज्ञानं परित्यजेत् ।। इति ।

शिवपदच्छायां लब्ध्वेति, अनाद्यशुद्धिशून्यत्वात्, शिवसंज्ञकं पदं वस्तुच्छायां परां ज्योतिर्मयं लब्ध्वा प्राप्य, "छायासूर्यप्रियाकान्तिः प्रतिबिम्बमनातपम् " इत्यमरः। तथा च। निर्मलशिवस्वरूपवस्तुज्योतिर्मयं प्राप्येत्यर्थः। एवं सिद्धो मुक्त एव।

तथा च आगमे -

श्लो - गोदेहमिषुपातं वा नयनोन्मीलमात्रकम्।
सकृत्परपदे युक्तो न पुनर्भवमाप्नुयात् ।। इति ।।

पञ्चाक्षरीं ध्यायेदिति, पञ्चानां अक्षराणां समाहारः पञ्चाक्षरी, अकारोकारमकारबन्दुनादात्मकःप्रणवः। तत्स्थं तद्वाच्यं शिवमहमिति भावयेदित्यर्थः। ध्यानं भावनमिति पर्यायः।

तदुक्तं वातुळे -

श्लो - अकारश्च उकारश्च मकारश्च त्रिधा भवेत्।
तृतीयान्तर्गतं नादं तुरीयं हिमकारकम्।।

शिवधर्मोत्तरे -

श्लो - देवो गुणत्रयातीतः सर्वज्ञस्सर्वकृत्प्रभुः।
ओमित्येकाक्षरे मन्त्रे स्थितस्सर्वगतश्शिवः ।।

सूत संहितायाम् -

श्लो - ॐङ्कारशब्दः सर्वार्थवाचकः परिकीर्तितः।
प्रयोगादेव सर्वत्र सर्वार्थश्शिवे (व)एव हि ।।
तस्मात् शिवस्य पूर्णस्य प्रणवो वाचकः स्मृतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वाच्यवाचकभावश्च लक्ष्यलक्षणतापि च ।
अन्यानपि च सन्त्येव परमार्थनिरूपणे ।।

सर्वज्ञानोत्तरे –

श्लो – अहमात्मा शिवोह्यन्यः परमात्मेति यस्स्मृतः ।
एवं यो पासते मोहात् न शिवत्वमवाप्नुयात् ।।
शिवोऽन्यस्त्वहमव्यर्थः पृथग्भावं विवर्जयेत् ।
यश्शिवस्सोहमेवेति अद्वयं भावयेत्सदा ।।
अद्वैतभावनायुक्ताः सर्वत्रात्मनि संस्थिताः ।।

देविकालोत्तरे –

श्लो अहमेव परं ब्रह्म जगन्नाथो महेश्वरः ।
इति सान्निश्चितो मुक्तो बद्धस्यादन्यथा पुमान् ।।" इति – किञ्च वेदे –

ॐकारवाच्यस्यामृतब्रह्माक्षराव्ययशिवरूपतया प्रतिपादितत्वात्, सूक्ष्मपञ्चाक्षरीं प्रणवार्थशिवं मुहुश्चिन्तयेत् ।।

मुहुर्मुहुरिति, लयविक्षेपत्यागेन समाधिं यातीत्यर्थः ।

तदुक्तं स्तवराजे –

श्लो – ॐकारममृतं ब्रह्म शिवमक्षरमव्ययम् ।
यमामनन्ति वेदेषु तं प्रपद्ये विनायकमिति ।।

विगतो नायको यस्य सः विनायकः, अनाश्रिता समुद्रापन्ननदीजलवत् समरसीभावतया भवेत्, लयविक्षेपत्यागसममिति, वचनम् ।।

देवीकालोत्तरे –

श्लो – निद्रायां बोधयेच्चित्तं विक्षिप्तं समये पनः ।
पक्षद्वयपरित्यागे सम्प्राप्ते च न चालयेत् ।। इति ।।

अपि च अकारादि पञ्चाक्षर्यङ्गैः, निर्मलजाग्रादादि पञ्चावस्था भवेत्, तद्यथा । निर्मलजाग्रकारणकार्याधिष्ठातृक्रियाशक्तिकारणबाह्यान्तरिन्द्रियाकारान्न–

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मयकोशहृदयस्थानसम्युक्तात्मा, शिवतत्त्वादि पृथिवीतत्त्वपर्यन्तचराऽचरात्मकसर्वप्रपञ्चं यद्वालोकयति, तथा निर्मलजाग्रम् ।

तदुक्तं देवीकालोत्तरे –

श्लो – शिवाद्यवनिपर्यन्ते लोकोऽयं शङ्करात्मकः ।। इति ।

निर्मलस्वप्नकारणोकाराधिष्ठातृज्ञानशक्तिकारणोन्तःकरण – चतुष्टयाऽधारप्राणमयकोशकण्ठकूपस्थानसम्युक्तं सकलप्रपञ्चं सत्तामात्रेण–स्वानन्यशिवे यदा मानसप्रत्यक्षं करोति, तदा निर्मलस्वप्नं निर्मलसुषुप्तिकारण–मकाराधिष्ठातृकश्च अशक्तिकारणबुध्याधारमनोमयकोशतालुमूलस्थान सम्युक्तात्मा देहेन्द्रियमनांसि विहाय शिवज्ञाने शिवं यदाऽनुभवति, तदा निर्मलसुषुप्तिनिर्मलतुर्यकारणबिन्द्वधिष्ठात्र्यादिशक्तिकारणचित्ताधारविज्ञानमयकोश–भ्रूमध्यस्थानसम्युक्तात्मा ज्ञानमपि त्यक्त्वा शिवयोगेन शिवानन्दानुभवी सन् शिवाऽनन्यतया यदा वर्तते तदा निर्मलतुर्यं, निर्मलतुर्यातीतकारणसर्वज्ञत्वाद्य–भिव्यक्तिकरणादाधिष्ठातृपराशक्त्याधारानन्दमयकोशब्रह्मरन्ध्रसम्युक्तात्मा अखण्डाकारसच्चिदानन्दाद्वयपरिपूर्णशिवे अस्याशयेन यदा निमज्जति तदा निर्मलतुर्यातीतम् ।

तदुक्तं सिद्धान्तबोधे –

जाग्रत्कारणयोगसंवेदनहृति उभयेन्द्रियवृत्याथ लीलत्वकार वेदन–स्वप्नोन्तःकरणैरेवार्गळदेशतः लीनस्य तु विषयाख्यार्णयोग संवेदनं यथा–

श्लो – लीनान्तःकरणं वृन्ते सुषुप्तिस्तालुदेशतः ।
बिन्दूदयस्तुरीयं तु भ्रूमध्ये स्थितिको ततः ।।
कार्यकारणयोरत्र वृत्यादेश्च सत्यापि सङ्ग्रहः ।
सर्वार्थदृक्क्रियाव्यक्तिहेतोर्नादस्य वेदनम् ।।
तुर्यातीता च रन्ध्रेच घंटानादश्च सङ्ग्रहम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सिद्धान्त सारावल्याम् –

श्लो – बाह्यान्तः करणैरणोस्स्वविषयज्ञानं तु जाग्रच्च(जागर्त्यतः) तत्।
स्वप्नेन्तः करणस्थवृत्तिविषयज्ञानं सुषुप्तिः परम् ।।
देहे त्विन्द्रियहीनमेव वचोग्रह्यामतिस्तुर्यकम्।
देहाक्षोपरता सुचिन्मतिरथातीतं शिवत्वोदयः ।। इति ।

एतदवस्था जीवन्मुक्तोऽखन्डाकार सच्चिदानन्दाद्वय शिवाकारतया विराजते।

तदुक्तं किरणे –

श्लो – भग्ने घटे यदा दीपस्सर्वतस्सम्प्रकाशते।
देहपाते तथा चात्मा भाति सर्वत्र सर्वदा ।। इति ।

अथ ज्ञानेन त्यागादिप्रपञ्चलक्षणादि शिवानुभवपर्यन्ता दशविधक्रमास्सन्ति।

तद्यथा सिद्धान्तबोधे –

श्लो – प्रथमं तत्त्वरूपं तु द्वितीयं तत्त्वदर्शनम्।
तृतीय तत्त्वशुद्धिश्च चतुर्थन्त्नात्मलक्षणम्।।
पञ्चमं त्वात्मसन्दर्शः षष्टमात्मविशुद्धिदः।
सप्तमं शिवरूपं तु ह्यष्टमं शिवदर्शनम्।।
नवमं शिवयोगश्च दशमं शिवभोगकम्।
त्रिभिस्तु तत्त्वरूपाद्यैः पाशभेदः प्रकीर्तितः।।
आत्मनो लक्षणाद्यैश्च पशुरूपं प्रकीर्तितम्।
चतुर्भिश्शिवरूपाद्यैः पतिसायुज्यमीरितम् ।।" इति ।

एवं ज्ञानलब्धज्ञेयशिवस्वरूपस्य जीवन्मुक्तस्याचारमाह ।।

देवीकालोत्तरे –

श्लो – ज्ञानमित्थं वरारोहे कथितं मोक्षसिद्धये ।
आचारं कथ्यते देवि साम्प्रतं शृणु तन्मया।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न ध्यानं नजपः पूजा न होमो नैव साधनम्।
नाशि कार्याणि कार्याणि न तस्यास्तु महेश्वरि ।।
नियमोऽपि न तस्यास्ति क्षेत्रपीठे च सेवना।
नार्चनं पितृकार्यञ्च तीर्थयात्रा व्रतानि च ।।
धर्मा ऽधर्मफलं नास्ति न तिथिर्लौकिकक्रिया।
सन्यसेत् सर्वकर्माणि लोकाचारमशेषतः ।।
येन केनापि वेषेण सर्वावस्थोऽपि योगवित्।
क्षेत्रपीठे च स्वं देहं वर्जयेद्यदि कौतुकम् ।।
क्रिमिकीटपतङ्गाश्च ततो देवीवनस्पतीन्।
चूर्णयेद्धातयेन्नैवं परमार्थे मतिर्यदा ।।
न मूलोत्पाटनं कृत्वा तृणच्छेदं विवर्जयेत्।
भूतपीडां न कुर्वीत पुष्पाणाञ्च निकृन्तनम् ।।
स्वयं पतितपुष्पैस्तु कर्तव्यं यतिपूजनम् ।
मारणोच्चाटनादीनि विद्वेषस्तम्भनं तथा ।।
ज्वरभूतग्रहावेशवश्याकर्षणमोहनम् ।
न कुर्यात् क्षुद्रकर्माणि काष्ठपाषाणपूजनम्।।
न मुद्राश्चं मुखं त्यक्त्वा व्यापकं बोधमाश्रयेत्।
समेतवीतरागत्वं समदुःखसुखस्तदा ।।
समः कुमित्रे मित्रे च समलोष्टाश्मकाञ्चनः।
आत्मरामो भवेद्योगी निर्भयो विगतस्पृहः।।
समनिन्दाप्रशंसस्तु सर्वभूतदयस्सदा।
समदृष्टिश्च कर्तव्या यदात्मनि तथा परे।।
ईर्ष्यापैशुन्यडम्बाश्च रागं मात्सर्यमेव च ।
कामक्रोधभयं शोकं त्यजेत् सर्वं शनैश्शनैः।।
सर्वद्वन्द्वविनिर्मुक्तस्सन्ततं जनवर्जितम् ।
अनैनैव शरीरेण सर्वज्ञत्वं प्रजायते ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ज्ञानेनैव यदा मोक्षस्तदा सिद्धेः निरर्थता ।
तथापि भोगमिच्छन्ति सिद्धिमिच्छन्ति साधकाः ।।
अणिमादिगुणावाप्तिर्जायतां वा न जायताम् ।
तथापि मुच्यते देवि पतिविज्ञाननिर्मलः ।।" इति ।

अयमाचारस्सन्यासिनां; गृहस्थस्तु धर्मसमयाचारं न लङ्घयन् फलानपेक्षया वेदशिवागमोक्तनित्यनैमित्तिककर्म कुर्यात् ।।

तदुक्तं सर्वज्ञानोत्तरे –

श्लो – यस्मिन्वर्णस्थिते दीक्षां प्राप्तो देही शिवात्मिकाम् ।
तत्रैव संस्थितो दीक्षां शिवधर्मञ्च पालयेत् ।।

मृगेन्द्रे –

श्लो – इति वर्णाश्रमाचारान् मनसापि न लङ्घयेत् ।। इति ।

श्रीनिगमागमपारावारगत सदाशिवशिवाचार्यविरचितायाम् सिद्धान्तसूत्रवृत्तौ शिवानुग्रहात् शिवानुभूतिप्रतिपादनं नाम पञ्चमः पटलः ।

सव्याख्याने शिवज्ञानबोधे
दशमसूत्रं प्रारभ्यते

अव :– एवम्भूतज्ञानसिद्धः प्रारब्धकर्मवशात् पुनरपि भौतिकदेहस्सन्, प्रपत्या आगामिकर्मफलम् मलमायावासनादींश्चावाप्तुं शिवानन्दानुभवात् । स्वानुभूतिमान् भवतीति दर्शयति, दशमसूत्रेण ।

१० – सूत्रम्

सू – शिवेनैक्यं गतस्सिद्धस्तदधीनस्ववृत्तिकः ।
मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान् ।।

पद :– शिवेनैक्यङ्गतस्सिद्धः ,तदधीनस्ववृत्तिकः, मलमायाद्यसंस्पृष्टः, स्वानुभूतिमान्, भवतीति योजना ।। १० ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

व्याख्या :- शिवेनैक्यङ्गतस्सिद्ध इति, सर्ववस्तुष्वपि शिवस्य शिवे च सर्ववस्तूनां विभागापन्नेन वर्तनं दृष्ट्वा , बाह्येन्द्रियान्तकरणैश्शनैश्शनैः त्यक्त्वा निर्मलतुर्यातीतो भूत्वा, शिवेनैक्यं प्राप्तःसिद्धः ऐक्यङ्गत इति पदेन देहविनाशो ज्ञानसन्तति-विच्छेदोऽष्टगुणो व्याप्तितम् और्ध्वगमनं, प्रकृतिभूतविवेकं कृत्वा, प्रकृतिं विहाय, पुरुषमात्रतयावस्थानं, ज्ञानेच्छाप्रयत्नादीन्परित्यज्य पाषाणवदवस्थितिः। आप्राकृतलोके, वैकुण्ठे श्रीहरिसन्निधौ तत्सारूप्यम् अनन्तकल्याणगुणांश्च व्या(प्रा)प्य दासभावेन वर्तनम्।

अनिर्वचनीयाऽविद्या निवृत्तिसादाख्ये तत्त्वे सदाशिवसमत्वेनावस्थानं नादतत्त्वे शिवसमत्वेन वर्तनम्।

एतेन शिवगुणसङ्क्रान्ति, शिवगुणसमुत्पत्ति, शिवगुणसमावेश, शिवगुणसमत्वाभिव्यक्ति... इत्यादि मुक्तयो व्यावृत्ताः।

तदधीनस्ववृत्तिकः शिवकरणात्मकेच्छाज्ञानक्रियाशक्त्यभिभूतस्वेच्छा-ज्ञानक्रियाशक्तिमत्वेन पिशाचग्रस्तपुरुष इव शिवायत्तमनोवागिन्द्रियकायव्यापार-वानित्यर्थः। अत एव मलमायाद्यसंस्पृष्ट इति आत्मनि शिवसमवेतचिच्छक्तिप्रकाशेना अज्ञानात्मकारणवमलमोहात्मकमायिकागायिककर्मभिरसम्बद्ध इत्यर्थः।

एवं धृढतरप्रपत्त्या स्वानुभूतिमान् भवतीति निर्मलतुर्यातीततया शिवैक्यस्य प्राप्तत्वात् तच्छिवानन्दं स्वानन्यतया नु भविता भवति।

एतेनाऽभेदशिवस्वरूपस्य, तस्य कर्तृभोक्तृत्वनिग्रहानुग्रहादि सर्वव्या-पाराणं शिवकृत्यत्वादागामिककर्मत्वां न प्राप्नोति, किन्तु तस्य महात्मनः स्तुतिनिन्दापूजातिरस्कार एवेत्यवधेयम्।

तदुक्तं देवीकालोत्तरे -

श्लो - ईदृशं ज्ञानिनं दृष्ट्वा पूजयन्ति च ये जनाः।
गन्धं पुष्पं फलं धूपं स्नानं वस्त्रं च भोजनम्।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निवेदयन्ति ये केचित् वाङ्मनःकायकर्मभिः ।
तेऽपि तत्रैव मुच्यन्ते मुक्तिमार्गानुकाङ्क्षिणः ।।
स्तुतिनिन्दाप्रशसम्भ्यां पुण्यपापमवाप्नुयात् ।।

भारते –

श्लो – प्रारब्धं भोगतो नश्येत् शेषं ज्ञानेन दह्यति ।
इतरं द्वितयं कर्म तद्द्वेषी प्रियवादिनः ।।
शिवधाम्नापुतस्यास्य भोगभोक्ताय जातुचित् ।
अकृत्वमधिकारित्वं पतिकृत्यानुकारतः ।।

शिवधर्मोत्तरे –

श्लो – यदा वायुः न शीघ्रोऽपि मुक्त्वाकाशं न गच्छति ।
ज्ञेयनिक्षिप्तचित्तन्तु विषयस्थो न मुञ्चति ।।
मन्त्रौषधिबले यद्वत् जीर्यते भक्षितं विषम् ।
तद्वत्सर्वाणि पापानि जरते ज्ञानिनः क्षणात् ।।
यथा वह्निर्महादीप्तःशुष्कमात्रं च निर्दहेत् ।
तथा शुभाशुभं कर्म ज्ञानाग्निर्दहति क्षणात् ।।
यद्वन्मन्त्रबलोपेतः क्रीडन्सर्पैर्न दंश्यते ।
क्रीडन् न लिप्यते ज्ञानी तद्वदिन्द्रियपन्नगैः ।।
पद्मपत्रं यथा तोये ततस्थैरपि न लिप्यते ।
तथा शब्दादिभिः ज्ञानी विषयैर्न हि लिप्यते ।। इति ।

इति श्रीनिगमागमपारावारगतसदाशिवशिवाचार्यविरचितायां सिद्धान्तसूत्रवृत्तौ प्रपत्तिमार्गप्रतिपादनं नाम षष्टः पटलः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सव्याख्याने शिवज्ञानबोधे
एकादशद्वादशसूत्रे प्रारभ्येते

अव :- अथोत्पन्नज्ञानिनां, कृतघ्नतादोषपरिहाराय लोकानुग्रहाय, चानुत्पन्नज्ञानिनां ज्ञानोत्पत्तिनिमित्ताय चान्तर्बाह्यभक्तिशिवयोगक्रियाचर्याः, एकादशद्वादशसूत्राभ्यामाह -

११ - सूत्रम्

सू ।। दृशो दर्शयिता चात्मा तस्य दर्शयिता शिवः।
तस्मात्तस्मिन् परां भक्तिं कुर्यादात्मोपकारके ।। इति ।

१२ - सूत्रम्

सू ।। मुक्त्यै प्राप्य सतस्तेषां भवेद्वेषं शिवालयम्
एवं विद्याच्छिवज्ञानबोधे शैवार्थनिर्णयम् ।। इति ।।

पद :- दृशो, दर्शयिता, च, आत्मा, तस्य, दर्शयिता, शिवः, तस्मात्, आत्मोपकारके, तस्मिन्, परां भक्तिं, कुर्यादिति योजना ।। ११ ।।

मुक्त्यै, सतः, प्राप्य, तेषां, वेषं, शिवालयं, च, भवेत्, एवं, शिवज्ञानबोधे, शैवार्थनिर्णयं, विद्यात्, इति, योजना ।। १२ ।।

व्याख्या :- दृशो दर्शयिता चात्मा तस्य दर्शयिता शिवः इति, यदा चक्षुरादीन्द्रियाणां रूपादिविषयप्रवर्तको जीवात्मा, तथा - अकृतसंस्काराणां बुभुक्षूणां शब्दादिविषयं च, कृतसंस्काराणां मुमुक्षूणां स्वसंवेदनं स्वसंवेद्यं च प्रसादयिता शिव इत्यर्थः ।। तस्मादात्मोपकारके, तस्मिन्परां भक्तिं कुर्यादिति, भवदुःखसागरोद्धारमुखकरुणाहस्तस्वस्वरूपानन्दामृतसागरनिमज्जनकारकात्मसहाये शिवे, भक्तिकारणे प्रत्ययात् स्वात्मानुरागान व्युत्कृष्टानुगुणेन, यावज्जीवं शिवज्ञानयोगे हस्तक्रियाचर्याभ्याञ्च, शिवयजनं कुर्यात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तथा आगमे –

श्लो – यजनं सम्प्रवक्ष्यामि यथाविध्यनुपूर्वगम्।
द्वितीयं तच्च विज्ञेयं अधिकार्यानुरूपतः ।।
यतीनां योगिनां चैव बाह्योपरतशक्तिषु ।
अन्तर्यागस्तु विहितो बाह्यपूजापरेषु च ।। इति ।।

ननु श्रुतिपुराणेष्विन्द्रपुरोगमान् देवान् यजेतेत्युक्तत्वात्, शिव एक एव यजेतेत्येतत् कथमितिचेत्, उच्यते, येन विना सत्कर्मापि दोषाय यद्भक्त्या दुष्कर्मापि सुकृतं भवेत्, स एव पूजनीयः। एतन्निदर्शनं दक्षप्रजापतौ चण्डेश्वरे च दृष्टं, किञ्च, जननमरणदुःखापनोदने जननमरणरहित एव समर्थः । तादृशश्च शिव एक एव, अपि च, मुक्तव्यापकाखण्डाकारसच्चिदानन्दाद्वयरूपत्वा-देतन्मुक्तिप्रदाता तादृक् लक्षणलक्षित एव, अतः शिव एव पूजनीयः, गुणाधिष्ठित-मूर्तिमतां ब्रह्मविष्णुपुरोगमाणां एतत्परशिवाभिव्यक्ततया तदात्मकत्वात् तदुद्देशेन सूचयंस्तान् पूजयन्ति, किञ्च भूसुरादिषु कृतपूजानां फलदातारस्तैर्विना यथा तेषूद्दिष्टदेवतानां तथा इन्द्रपुरोगमादिषु कृतपूजानामपि तेषामन्तर्यामित्वेन-वाऽभिव्यक्त्या तदात्मकत्वेन शिव एक एव फलदाता ,तस्मात् मुख्ये सम्भवति गौणस्यन्याय इति न्यायेन, शिव एव प्राधान्येन पूजनीयः, इतरे तदङ्गत्वेन पूजनीयाः।

तदुक्तं पाराशरे –

श्लो – सर्वमन्यत्परित्यज्य शिव एव शिवङ्करः।
ध्येय इत्याह परमश्रुतिराथर्वणी खलु ।।

कूर्मे –

श्लो – अहं हि सर्वयज्ञानां भोक्ता चैव फलप्रदः।
यद्यत्करणगोप्ताहं निहन्ता वेदविद्विषाम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

देवीकालोत्तरे –

श्लो – ब्रह्मादिभिर्देवमनुष्यनागगन्धर्वयक्षाप्सरसाङ्गणैश्च ।
मखैरनेकैरहमेव पूज्योमामेव सर्वे प्रवदन्ति वेदाः ।
तपोभिरुग्रैर्विविधैश्च दानैर्मामेव सर्वे प्रतिपूजयन्ति ।।

ब्रह्मगीतायाम् –

श्लो – एवं रूपप्रसादस्तु कारितस्तु शिवेन च ।
ज्ञायते न मया नान्यैर्देवैर्नारायणेन च ।।
अतस्सर्वं परित्यज्य शिवादन्यत्तु दैवतम् ।
तमेव शरणं गच्छेः सद्योमुक्तिं यदिच्छसि ।। इति ।

अथ ज्ञानपूजाक्रमो यथा

कामिके –

श्लो – न दिने पूजयेद्देवं रात्रौ नैव च पूजयेत् ।
सन्ततं पूजयेद्देवं दिवारात्रौ च वर्जयेत् ।।

अस्यार्थः दिनं विकल्पज्ञानं, तस्मात् सकलकेवलावस्थैः त्यक्त्वा निर्मलजाग्रदादिना सन्ततं शिवं पूजयेदिति ।। अत्र पञ्चशुद्धिक्रमः भूतपरिणामदेहराहित्यं भूतशुद्धिः । विषयाभिलाषराहित्यं द्रव्यशुद्धिः । अथवा शिवाष्टमूर्तित्वदर्शनं भूतशुद्धिः । शिवस्य सर्वद्रव्यानुप्रवेशदर्शनं द्रव्यशुद्धिः पञ्चाक्षरे पाशपदार्थवाचक नमः वदं हित्वाविव शिवज्ञानजीवात्मवाचकं शिवाय इत्येतत्पदं ज्ञात्वा जीवात्मनः शिवज्ञानेन शिवदर्शनं मन्त्रशुद्धिः ।

तदुक्तं सिद्धान्तबोधे –

श्लो – हित्वा नमः पदं तस्य शिवाय इति कीर्त्यते ।
शुद्धपञ्चाक्षरमिदं स्वानुभूतिप्रकाशकम् ।। इति ।

शिवज्ञानेन स्वस्वरूपमालोक्य, तन्मयत्वेन स्थितिरात्मशुद्धिः । अखण्डाकारसच्चिदानन्दस्वरूपानुभवैकवेद्यं शिवमिति भावना लिङ्गशुद्धिः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथासनमूर्त्यादि क्रमः

श्लो – आत्मा शिवासनं मूर्तिं सत्यज्ञानमनावृतम् ।
मूलं तु परमानन्दमावाहनमथोच्यते ।।
शिवाभिव्यक्तिरेवात्र ह्यावाहन मिति स्मृतम् ।
नैश्चल्यं स्थापनं चाभिमुख्यं तत्सन्निधानकम् ।।
लयविक्षेपगणनं सन्निरोधनमुच्यते ।।

पूजास्तवे –

श्लो – आवाहनं चात्मनि चित्प्रकाशं तत्र स्थितिस्थापनमीश्वरस्य ।
सान्निध्यमात्मेस्वरसन्निधानसंरोधनं स्वस्य शिवे निरोधः ।।
अतः परं प्रवक्ष्यामि पाद्यादि शिवपूजनम् ।
मायाद्वयस्य गळनं पाद्यमाचमनं तथा ।।
कर्मत्रयविनाशस्स्यादर्घ्यमज्ञानमोचनम् ।
महाभिषेकं नैर्मल्यं वस्त्रशुद्धिनिरावृतिः ।।
निर्लेपनञ्च श्रीगन्धो द्वन्द्वत्यागप्रसूनकम् ।
अज्ञानवासनानाशो धूपो दीपस्वयं प्रभा ।।
शिवानुभूतिनैवेद्यं पानीयं च सुभाषितम् ।
रसास्वादस्य गळनं हस्तोद्वर्तनामीरितम् ।।
कषायगळनं जातं ताम्बूलं मुखवासनम् ।
आगतार्घस्य नादस्य लयस्तोत्रं समीरितम् ।।
प्रदक्षिणं च सर्वत्र व्यापिनं सह शम्भुना ।
सरित्समुद्रसंयोगाज्जलं समरसं यथा ।।
तदात्मा शिवयोर्योगे नमस्कारः प्रकीर्त्यते ।
ज्ञाता ज्ञानं यथा ज्ञेयं भग्नं भवति तत्तथा ।।
पराङ्मुखार्घ्यमित्याहुरात्मनश्च निवेदनम् ।। इति ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथ योगमार्गपूजा –

श्लो – चन्द्रार्कनाशने पूजा साधयेदीप्सितं फलम्।
सुषुम्ना मध्यगे प्राणे पूजयेत् सर्वदा शिवम् ।।

अस्यार्थः चन्द्रस्त्विडानाडी। अर्कस्तु पिङ्गळानाडी, तन्नाशः उच्छ्वासनिश्वासराहित्यं तदेव केवलकुम्भकम् पूजा । तत्र शिवानुफल एव ईप्सितफलम् । अणिमादि सिद्धिर्मुक्तिश्च ते सिद्धिर्मुक्तिं साधयेत्, प्राणवायौ सुषुम्ना रन्ध्रे प्रविष्टे सति शिवानुभूतिमान् भवेत्।। अत्र क्रमः, वायुं निरुध्य मूलाग्निं मूलवायुना बिन्द्वन्ताग्निबीजेन उद्बोध्य, नाडीचक्रं भित्वा सुषुम्ना मार्गेण हृदयाद्यकारादि, ब्रह्मादि कारणत्यागेन ब्रह्मरन्ध्रं प्रविश्य अखण्डज्योतिरूपे यन्मज्जनं तदेव पूजनम् । अत एव शिवाश्रमिणां गृहस्थानं पञ्चमहायज्ञा उच्यन्ते।

यथाह शिवधर्मोत्तरे –

श्लो – अथ पूजाग्निकार्याद्यैर्बोधैर्बहुविधैस्ततः।
कर्मयज्ञस्समाख्यातस्तपश्चान्द्रायणादिकम् ।।
स्वाध्यायश्च जपः प्रोक्तः शिवमन्त्रस्य स त्रिधा।
ध्यानयज्ञस्समाख्यातश्शिवचिन्ता मुहुर्मुहुः ।।
अध्यापनं चाध्ययनं व्याख्या क्रमेण चिन्तनम्।
इति पञ्चप्रकारोऽयं ज्ञानयज्ञः प्रकीर्तितः ।।
उत्तरोत्तरवैशिष्ट्यं सर्वेषां परिकीर्तितम्।
पञ्चानामपि यज्ञानां ज्ञानयज्ञो विमुक्तिदः ।।

इति उक्त पञ्चमहायज्ञाशक्तानां मन्दशक्तिनिपातवतां ज्ञानोत्पत्तिनिमित्तं चर्यापादानुष्टानक्रममाह ।।

मुक्त्यै प्राप्येत्यादिना, मुक्त्यै सदः प्राप्येति मुक्त्यर्थं शिवज्ञानयोगवतो यतीन् शरणं प्रपद्यते, तेषां वेषं शिवालयं च भजेदिति, तादृशयतीनां तपोवेषं शिवसंस्कारपुरस्सरं तदाज्ञया धृत्वा, शिवालयस्थ शिवलिङ्गाद्यर्चावतारान्, शिवयोगिनो शिवचिह्नधारिणो माहेश्वरांश्च सेवेत।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथा शिवधर्मोत्तरे –

श्लो – ब्राह्मणः क्षत्रियो वैश्यः स्त्री शूद्रो वा शिवाश्रमी।
ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।।
भूतिशासनसंयुक्तो(क्तः)सम्पूज्यो राजपुत्रवत् ।
गुणवत्पात्रपूजाया वरं शासनपूजनम् ।।
शासनं पूजयेदस्मादविचारं शिवाज्ञया ।
शिवाज्ञा पूजनात् साक्षात् शिवोऽहमिति पूजितः ।।
अविकल्पमतिस्तस्मात्पूजयेच्छिवशासनम् ।
यथासम्भवपूजाभिः कर्मणा मनसा गिरा ।।
शिवभक्तिस्सदा कुर्यात्तद्वच्च शिवयोगिषु ।
स्वदेहान्निर्विशेषेण शिवभक्तांश्च पालयोत् ।।
भयदारिद्र्यरोगेभ्यस्तैषां कुर्यात्प्रियाणि च ।
शिवस्य परिपूर्णस्य किं नाम क्रियते जनैः ।।
यत्कृतं शिवभक्तानां तत्कृतं च शिवे भवेत् ।
सुदूरमपि गन्तव्यं यत्र माहेश्वरो जनः ।।
प्रयत्नेनापि दृष्टस्य तत्र सन्निहितश्शिवः ।
महेश्वरस्य भक्तस्य शिवार्चासहितस्य च ।।
पूजां कृत्वा यथा न्यायम् अश्वमेधफलं भवेत् ।
नित्यं शिवकथासक्तो नित्यं शिवपरायणः ।।
अर्चयित्वा यथा न्यायं गाणापत्यमवाप्नुयात् ।
शिवाश्रमगतान् भक्त्या शिवभक्तान् प्रपूजयेत् ।।
स्वागतासनपाद्यार्घ्यमधुपर्कादिकैस्सदा ।
पूजायित्वा यथा न्यायं कुर्यादप्यभिवादनम् ।।
यस्सर्वसङ्गनिर्मुक्तश्शिवश्शिवपरायणः ।
सोऽपीह पवनं कृत्वा योगीन्द्रानुचरो भवेत् ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वसेदायतने नित्यं सगुणश्शिवधार्मिकः ।
पुष्पारामैककर्मात्मा पुष्पवाटीक्रियापरः ।।
त्रिस्नानपूजासंयुक्तकौपीनाच्छादनस्तथा ।
योगानां भक्तियोगेन योगस्थानमवाप्नुयात् ।।
शिवध्यानपराश्शान्ताश्शिवधर्मपरायणाः ।
सर्व एवाश्रमा ज्ञेयाः शिवधर्माश्शिवाश्रमाः ।।
महाव्रताष्टमं धार्यम् ईशानोक्तं शिवार्थिभिः ।।
सर्वव्रतानां प्रवरमस्मिन्धर्मस्समाप्यते ।। ”

वायव्ये च –

श्लो – शिवे भक्तिस्सदाशान्तिरहिंसा सर्वदा दमः ।
सन्तोषः सत्यमस्तेयं ब्रह्मचर्यं तथाष्टमम् ।।
यथा सम्भवपूजाभिः कर्मणा मनसा गिरा ।
शिवभक्ति स्सदा कुर्यात् तद्वच्च शिवयोगिषु ।।
एवं विद्यात् शिवज्ञानबोधे शैवार्थनिर्णयम् ।। इति ।।
इत्थं शिवज्ञानबोधे द्वादशाभिधसूत्रैः प्रतिपादितं मुमुक्षुर्जानीयादित्यर्थः ।।
इति ।।

श्रीनिगमागमपारावारादिविशेषगुणयुक्तसदाशिवशिवाचार्यविरचितायां सिद्धान्तसूत्रवृत्तौ, शिवयोगक्रियाचर्याप्रतिपादनं नाम सप्तमः पटलः ।।

शिवं भूयात्

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO



Center for Shaiva Studies, Pondicherry Collection